# || श्रीललिता-सहस्रनामम् ||

## || श्रीललिता-त्रिशती ||

### (स्तोत्रम् – नामावलिः)




## महतीमण्डलम्

मद्रपुरि – ९३



Mahathee Mandalam Publication- 10
First Edition - 2017

copy right : Mahathee Mandalam ©
Chennai -600093

**Rs.20/-**

---

परस्परोच्चिष्टपरौ परौशिवौ परस्पराश्लिष्टतनूकुलेश्वरौ।
परस्पर श्रीचरणाभिवन्दिनौ पात्राभिनुत्यां स्फुरतांमयीशौ ।।

---

Copies can be had of
D.Sivasubramanian
Ph: 23763501/2

Printed by Creative Enterprises , Chennai-600026

# अनुक्रमणिका


| | | |
|---|---|---|
| श्रीललिता सहस्रनामस्तोत्रम् | ------------------ | १ |
| श्रीललिता सहस्रनामनामावलि: | ------------------ | ४० |
| श्रीललितात्रिशती स्तोत्रम् | ------------------ | ६० |
| श्रीललितात्रिशती नामावलि: | ------------------ | ६५ |




## Mahathee Mandalam

In the tantras and agamas the word 'Mandalam' is used in specific reference to the place where the poojas/yagas are performed invoking various devathas . It includes the place and also the time taken from the beginning to the end of the puja/yagas. 'Mahathee' refers to the presiding deity of the Sri Vidya sastram, Mahasakthi Lalitha who has the Tripura sundari as the peetam and who is the embodiment of ananda and the root of the parbrahma and kevala brahma sakthisreferred/explained in the Vedas. Mahathee's Mandalam hence naturally refers tothe universal mandalam.

In the Sri Vidya satram lineage (parampara) is very important and those who have acquaintance with upasakas and observed the level of their interest, devotion, depth of commitment etc. may understand/appreciate the importance of the parampara.

Pujyasri Devinatha Gurudeva got initiated from one such parampara, realized his true self lived in the exalted state of kameswara all through his life.Following the path of Maharishis he did Tapas living in the forests along with his consort Pujyasri Devi, who was Sri Matha herself. They established the divine mandalam called **"Mahathee Mandalam"** with the main objective of facilitating all true seekers to get initiated in the Sri Vidya Marga, worship Mahashakthi Lalitha and attain the self-realization which is the fruit of this birth.

Through persistent and continuous dhyana of Pujyasri Gurudeva, who has created this mandalam and which

unifies us, everyone can strive to achieve the self realization, the moksha, the ananda, the bliss by getting initiated into SriVidya upasana.

Pujyasri Gurudeva who understood and realized the true meaning and spirit of the veda marga due to his divine powers has explained to us the true vedic religion by his various teachings has said that this creation or birth is not due to ignorance, but there is a meaning/objective to it. The entire creation has come from Mahasakthi, the embodiment of bliss (ananda) and the objective/purpose of this birth is to merge with the energy from which this existence has come into being. The objective of the veda marga is to ensure that everyone in this life attain realization (bliss) by way of penance. The tantras, agamas emphasize the same and the purpose of Sri Vidya sastram is also the same.

Pujyasri Gurudeva advised that all should develop interest in the vedic path, enhance oneself by the various samskaras, obtain brahmagnana through Gayathri upasana and to attain moksha, the realization, one should get into the Sri Vidya margam through a proper guru and worship Sri Matha to attain the Ananda here and in eternity.

The main objectives of the mandalam are

1. Follow the Vedas and understand and perform the various rites etc. as said in the various sutras and the Vedas
2. Facilitate all to do their anushtanams by removing the obstacles to do the same by way of puja,japa and homams as advised by Gurudeva



3. Publish user friendly guides of the various rituals said in the Vedas and tantras for the welfare of the humanity
4. Maintain the Sri BalaVinayaka BalaSubramanya swamy temple at Kailasa konai (Andhra Pradesh) constructed by Gurudeva for the welfare of the humanity
5.Publish the monumental work of Gurudeva" **Srushti Sahacharam Parameswaram Veda Margam"** which explains the true Vedic/ Hindu religion andwhich contains the essence of all the Vedas,tantras and agamas

**PujyaSri Gurudeva Dampathi**

PujyaSri Devinatha Gurudevawhowas born in a family known for proficiency inVedas ,at Polagam in Thanjavur District,Tamil Nadu. He was very forthright in his views and always had his own ideas regarding the various practices followed in those days, particularly in matters like procedures followed in performing vedic rites ,our day to day life activities, treatment of women and insisted that they should be given due respect and equal rights and also said that everyone irrespective of caste, colour, creed or sex is eligible for Gayathri worship and follow the vedic path.He was initiated by SriMatha herself directly into Sri Vidya upasana and was guided to higher levels.

With his proficiency in Vedas ,Tantras ,Agamas and Vedangas, he undertook research work and prepared a monumental work called "SRUSHTI SAHACHARAM PARAMESWARAM VEDA MARGAM" in the 1940s in which he had written about what our true Vedic/ Hindu religion is and how we have deviated from the path of Vedas due to various philosophies and practices.

Pujya Sri Gurudeva had written the masterpiece "SRI VIDYA SUTRAM " which is a treasure to srividya upasakas.The sutram explains the concepts of the SriVidya, different levels in the upasana , concepts of creation ,last rites as per SriVidya for the evolved/realized. He cautioned all that due to reasons like invasions, interpolations, anti-Vedic concepts & philosophies and practices have penetrated into our system and urged all to be vigilent.

After his vivaha with Pujyasri Devi they proceeded to the Agastya Koota hills above the Bhaana Theertam water falls near Injikuzhi in the thick forest and started their Tapas. In June 1955 they shifted to Kailasa Konai forest in Andhra Pradesh which is about 100 Kms from Chennai and established the "Siva Sakthi Ashramam".

People from different places became his disciples and got initiated into Sri Vidya upasana . In 1969 they established Sri Balavinayaka Bala Subramanya swamy temple at konai at the place they did their Tapas. The temple along with with the Kowlesa and Gayathri temple in the Ashramam are now maintained their sishyas.

The avathara rahasyam of Poojyasri Gurudeva Dhampathy and their upadesams and many miracles experienced by various people have been given in detail in the various publications brought out by the Mahathee Mandalam.

**Mahathee Mandalam**



## Lalitha Sahasranama Stotram

Agni upasana is the lifeline of the Vedas which are the very foundation of our religion. So many great Maharishi dhampathys have devoted whole of their life in the upasana of Agni which is the embodiment of all the devathas. Great kulacharya maharishi dhampathys like Atri- Anasuya, Vasishta- Arundathi, Agastya- Lopamudra not only performed Brahmavidya upasana which are explicitly directed by Vedas but also practiced the greatest Anandavidya or Sri Vidya upasana which is advocated secretly by Vedas.

Maharishi Agastya –Lopamudra dampathy were one of the greatest Sri Vidya upasakas. Agastya is also called ‘’Kumha-Sambhava” in literal sense the name means “the one who was born from a Kumbha”. However when we understand secret yogic connotation of the word ‘’Kumbha”, we can infer the greatness of Agastya and the reason why he was called so.

He had great governance of many divine astra devatas like brahmastra and Divine incarnates like Lord Sri Rama revered him a lot. From these orientations, we can to an extent try to understand the valour of his penance and boundless spiritual strength. With such a person as a disciple and Sri Hayagreeva as Guru, the narration of their discussion on Sri Vidya is elaborated in Lalithopakhyanam which is the main part and the essence of Brahmanda purana.

Like Lord Shiva in Guru Swaroopa as Sri Dakshinamurthy, Lord Visnu’s Guru swaroopa is Hayagreeva, who is also adored as the protector of Vedas.

He, the supreme divine who is above all the devathas, indecipherable to human capacity, who has manifested as the Vedas, plays the role of Guru here, and bestowed his Anugraha to all by giving the supreme Lalitha sahasranama and Lalitha Trisathi through Sri AgasthyaIn the discussion between Sri Hayagreeva and Agastya, there is a very important point to be noted. Sastras say "नापृष्टः कस्यचित्ब्रूयात्", which means not to reveal unless it is asked. On the other hand sastras directs that it should not be concealed if one is a humble genuine seeker.

Hence, though while discussing about the the raise of Sri Matha, Bhandasura Vata , Pattabishaka of devathas, Yantras, Mantras and Nyasa of those devathas, description about Mantrini- Sri Raja Shyamala, Dandini - Sri Maha Vartali , methods of their upasana, and their Sahasranama etc., Sri Hayagreeva did not reveal the sahasranama of the supreme goddess Sri Lalitha . Yet he was the one who induced Agastya to request for the same and gave the sahasranamam. In spite of being a great upasaka and having the Lord himself as the Guru, Agastya with all the humility asked the Guru Hayagreeva as to whether he forgot to teach him the utmost of Sahasranamas or thought that he is yet to qualify himself to know the supreme one. This is example of how a Shishya should converse and conduct with his Guru.

Moved by the request and out of his bountiful grace on Agastya, Sri Hayagreeva revealed the Rahasya Sahasranama that was said by Vasinyadi eight Vak devatas.



Agasthya who was immersed in the ultimate bliss by his guru's grace pleads Sri Hayagreeva to bless him also with the ultimate secret stotrahinted in the course of discussion. The Most compassionate Sri-Hayagreeva acts hesitated so that Sri Matha Lalitha could herself appear before them and ask Sri Hayagreeva to teach Agastya, the most secret of the stotras called **SriLalitha Trishati.** Instantly the supreme goddess appeared and said that this is the Sarva Poorthikara stotra meaning "that stotra which completes everything."

Then Hayagreeva blesses his disciple for giving him an opportunity of seeing the Goddess Lalitha herself and discloses The Lalitha Trishathi stotra.

Trisati, is considered to be even more sacred and powerful than the Sahasranama as each and every Nama is a mantra. Each of the Namas are not just names, each nama itself is a *mantra* -- in the sense that they conceal esoteric spiritual energies and when recited, the very recitation, even without the understanding of the meaning, can give wonderful effects, just because of the vibrations they can generate. Trisati represents the essence of Sri Vidya sastra. The three hundred names in the *trisati* occur in groups of twenty names, one for each letter of the fifteen-letter Panchadasakshari mantra.

Hence it can be understood that Lalitha Sahasranama or Trisathi should be chanted only after getting panchadasi updaesa from a Guru. It need not be specified that, at least Bala mantropadesa is mandatory.

As in Lalitha-Trisathi, in Lalitha- Sahasranama, every Nama is a mantra. It should not be considered just as

names of Sri Lalithambika. With the knowledge of Panchadasi Mantra, one can understand the meaning and significance of Nama that describe vakbhava koota, Madya koota and Sakthi koota which denotes kesadi pada swaroopa of Paradevatha. Similar is the case with many other namas. So an aspirant should qualify himself to recite the Stotra.

One should approach a qualified Guru and get Mantropadesam in procedure (Ganapati, Subrahmanya, Bala and Panchadasi in order) and then recite Lalitha sahasranama along with the said Japa. This will bestow all the prosperities and gradually lead a person to self-realization.

Furthermore for a Sadhaka, it is a must to reach and surrender to a Qualified Guru and attain deeksha to achieve the objective of his/her Janma. There are certain essential qualities for a person to be a guru which are elaborated in various Tantras.

**Rshiyadi Nyasa**

Rshis are Mantra Drashtas meaning Rishis are the ones who conceived the mantras. Though they are not present in their gross or subtle bodies (Stula or Sookshma shareera) they help a person in many ways by their Causal body (Karana shareera). In the Nyasa, meditating the rishi of that particular mantra in shiras will invoke the energy of the Rishi. Further meditating the devatha in hrudhaya as said in the dhyana shloka will help the person to have vision of the devatha in the very same form the Rishis saw the devatha. Chandas is derived from the experience of rishis reciting the mantra in a particular



note. There are many Chandas like Anushtup, Trishtup etc.

After doing the Rishi, chandas and devatha nyasas, nyasas of the Beeja of the Mantra, the Shakti or energy generated by the mantra and Keelaka to streamline and protect the person doing the japa are done.This is common for all the Mantras.

As Lalitha sahasranama is more of a mantra, the nyasm of its rishis Vasinyadi eight Vak devathas in shiras, Anushtup chandas in Mukha and the devatha Sri Lalithambika in Hrudaya, instantly brings in the energy at the place where the japa is performed. The Vakbhava Kootam of Panchadasi mantra is the Bjeeja the kamaraja koota is the shakthi and the sakthi kootam is the keelakam for Lalitha sahasranama.

By performing these nyasas the hindrances are resolved and the viniyoga or The objective of the parayana is achieved.

Brahmam is classified as Sakala and Nishkala. Sakala Brahmam is further classified as Jagathatmakam and Jaganniyamakam. The manifestation as universe is Jagathatmaka brahmam and the state of brahmam that controls the universe is identified as parabrahmam or Jaganniyamaka brahmam. Para brahmam at a state of oneness without a distinction of “in or out”( para – Apara) consciousness is Kevalabrahamam.

Lalitha sahasranama is the stotra with thousand names of the supreme goddess Sri Lalitha parameshwari who conquires the entire cosmic dispensation with such a state of consciousness as her peeta. Some of the namas

in the sahasranama denotes para consciousness and some namas denotes Apara consciousness including the state of life existence. Some Namas denotes her control of execution and some denotes her energy variences. Such an complete embodiment of and Queen of all storas Sri Lalitha sahasranamam will certainly bestow all the wishes of the sadakas.

We are happy that this publication is brought out as part of the Navarathri celebrations of the Mandalam. We are sure that this book would be of immense use to all.

देवीनाथस्यदिव्याज्ञावर्धतांअभिवर्धतां।

दिगन्तव्यापिनीभूयात्साहिश्री: अमृतासतां॥

**॥सन्त्वाशिषः शिवशक्तयोः ॥**

30- 09- 2017
Chennai

D.Srikumar
Mahathee Mandalam



## ॥श्रीललितासहस्रनामस्तोत्रम्॥

**अगस्त्यउवाच**

अश्वाननमहाबुद्धेसर्वशास्त्रविशारद।
कथितंललितादेव्याःचरितंपरमाद्भुतम्॥१॥
पूर्वंप्रादुर्भवोमातुःततःपट्टाभिषेचनम्।
भण्डासुरवधश्चैवविस्तरेणत्वयोदितः॥२॥
वर्णितंश्रीपुरंचापिमहाविभवविस्तरम्।
श्रीमत्पञ्चदशाक्षर्याःमहिमावर्णितस्तथा॥३॥
षोढान्यासादयोदेव्याःन्यासखण्डेसमीरिताः।
अन्तर्यागक्रमश्चैवबहिर्यागक्रमस्तथा॥४॥
महायागाक्रमश्चापिपूजाखण्डेप्रकीर्तित:।
पुरश्चरणखण्डेतुजपलक्षणमीरितम्॥५॥
होमखण्डेत्वयाप्रोक्तोहोमद्रव्यविधिक्रमः।
चक्रराजस्यविद्यायाःश्रीदेव्यादेशिकात्मनोः॥६॥
रहस्यखण्डेतादात्म्यंपरस्परमुदीरितम्।
स्तोत्रखण्डेबहुविधाःस्तुतयःपरिकीर्तिताः॥७॥
मन्त्रिणीदण्डिनीदेव्योःप्रोक्तेनामसहस्रके।
नतुश्रीललितादेव्याःप्रोक्तंनामसहस्रकम्॥८॥
तत्रमेसंशयोजातोहयग्रीवदयानिधे।
किंवात्वयाविस्मृतंतज्ज्ञात्वावासमुपेक्षितम्॥९॥
ममवायोग्यतानास्तिश्रोतुंनामसहस्रकम्।
किमर्थंभवतानोक्तंतत्रमेकारणंवद॥१०॥

**सूतउवाच**

इतिपृष्टोहयग्रीवोमुनिनाकुम्भजन्मना।
प्रहृष्टोवचनंप्राहतापसंकुम्भसम्भवम्॥११॥

**श्रीहयग्रीवउवाच**

लोपामुद्रापतेऽगस्त्यसावधानमनाःशृणु।
नाम्नांसहस्रंयन्नोक्तंकारणंतद्वदामिते॥१२॥
रहस्यमितिमत्वाऽहंनोक्तवांस्तेनचान्यथा।
पुनश्चपृच्छतेभक्त्यातस्मात्तत्तेवदाम्यहम्॥१३॥
ब्रूयाच्छिष्यायभक्तायरहस्यमपिदेशिकः।
भवतानप्रदेयंस्यादभक्तायकदाचन॥१४॥
नशठायनदुष्टायनाविश्वासायकर्हिचित्।
श्रीमातृभक्तियुक्तायश्रीविद्याराजवेदिने॥१५॥
उपासकायशुद्धायदेयंनामसहस्रकम्।
यानिनामसहस्राणिसद्यःसिद्धिप्रदानिवै॥१६॥
तन्त्रेषुललितादेव्यास्तेषुमुख्यमिदंमुने।
श्रीविद्यैवतुमन्त्राणांतत्रकादिर्यथापरा॥१७॥
पुराणांश्रीपुरमिवशक्तीनांललितायथा।
श्रीविद्योपासकानांचयथादेवोवरःशिवः॥१८॥
तथानामसहस्रेषुवरमेतत्प्रकीर्तितम्।
यथास्यपठनाद्देवीप्रीयतेललिताम्बिका॥१९॥
अन्यनामसहस्रस्यपाठान्नप्रीयतेतथा।
श्रीमातुःप्रीतयेतस्मादनिशंकीर्तयेदिदम्॥२०॥
बिल्वपत्रैश्चक्रराजेयोऽर्चयेल्ललिताम्बिकाम्।
पद्मैर्वातुलसीपुष्पैरेभिर्नामसहस्रकैः॥२१॥



सद्यप्रसादंकुरुतेतस्यसिंहासनेश्वरी।
चक्राधिराजमभ्यर्च्यजप्त्वापञ्चदशाक्षरीम्॥२२॥
जपान्तेकीर्तयेन्नित्यमिदंनामसहस्रकम्।
जपपूजाद्यशक्तश्चेत्पठेन्नामसहस्रकम्॥२३॥
साङ्गार्चनेसाङ्गजपेयत्फलंतदवाप्नुयात्।
उपासनेस्तुतीरन्याःपठेदभ्युदयोहिसः॥२४॥
इदंनामसहस्रंतुकीर्तयेन्नित्यकर्मवत्।
चक्रराजार्चनंदेव्याजपोनाम्नांचकीर्तनम्॥२५॥
भक्तस्यकृत्यमेतावदन्यदभ्युदयंविदुः।
भक्तस्यावश्यकमिदंनामसाहस्रकीर्तनम्॥२६॥
तत्रहेतुंप्रवक्ष्यामिशृणुत्वंकुम्भसम्भव।
पुराश्रीललितादेवीभक्तानांहितकाम्यया॥२७॥
वाग्देवीर्वशिनीमुख्याःसमाहूयेदमब्रवीत्।
वाग्देवतावशिन्याद्याःशृणुध्वंवचनंमम॥२८॥
भवत्योमत्प्रसादेनप्रोल्लसद्वाग्विभूतयः।
मद्भक्तानांवाग्विभूतिप्रदानेविनियोजिताः॥२९॥
मच्चक्रस्यरहस्यज्ञाममनामपरायणाः।
ममस्तोत्रविधानायतस्मादाज्ञापयामिवः॥३०॥
कुरुध्वमङ्कितंस्तोत्रंममनामसहस्रकैः।
येनभक्तैःस्तुतायामेसद्यःप्रीतिःपराभवेत्॥३१॥

**हयग्रीवउवाच**

इत्याज्ञप्तावचो देव्यःदेव्याश्रीललिताम्बया।
रहस्यैर्नामभिर्दिव्यैश्चक्रुःस्तोत्रमनुत्तमम्॥३२॥
रहस्यनामसाहस्रमितितद्विश्रुतंपरम्।

ततःकदाचित्सदसिस्थित्वासिंहासनेऽम्बिका॥३३॥
स्वसेवावसरंप्रादात्सर्वेषांकुम्भसम्भव।
सेवार्थमागतास्तत्र ब्रह्माणी ब्रह्मकोटयः॥३४॥
लक्ष्मीनारायणानांचकोटयःसमुपागताः।
गौरीकोटिसमेतानांरुद्राणामपिकोटयः॥३५॥
मन्त्रिणीदण्डिनीमुख्याःसेवार्थंयास्समागताः।
शक्तयोविविधाकारास्तासांसंख्यानविद्यते॥३६॥
दिव्यौघामानवौघाश्चसिद्धौघाश्चसमागताः।
तत्रश्रीललितादेवीसर्वेषांदर्शनंददौ॥३७॥
तेषुदृष्ट्वोपविष्टेषुस्वेस्वेस्थानेयथाक्रमम्।
ततःश्रीललितादेवीकटाक्षाक्षेपचोदिताः॥३८॥
उत्थायवशिनीमुख्याबद्धांजलिपुटास्तदा।
अस्तुवन्नामसाहस्रैःस्वकृतैर्ललिताम्बिकाम्॥३९॥
श्रुत्वास्तवंप्रसन्नाऽभूल्ललितापरमेश्वरी।
सर्वे तेविस्मयंजग्मुर्येतत्रसदसिस्थिताः॥४०॥
ततःप्रोवाचललितासदस्यान्देवतागणान्।
ममाज्ञयैववाग्देव्यश्चक्रुःस्तोत्रमानुऽत्तमम्॥४१॥
अङ्कितंनामभिर्दिव्यैर्ममप्रीतिविधायकैः।
तत्पठध्वंसदायूयंस्तोत्रंमत्प्रीतिवृद्धये॥४२॥
प्रवर्तयध्वंभक्तेषुममनामसहस्रकम्।
इदंनामसहस्रंमेयो।भक्तःपठतेसकृत्॥४३॥
समेप्रियतमोज्ञेयस्तस्मैकामान्ददाम्यहम्।
श्रीचक्रेमांसमभ्यर्च्यजप्त्वापञ्चदशाक्षरीम्॥४४॥
पश्चान्नामसहस्रंमेकीर्तयेन्ममतुष्टये।



मामर्चयतुवामावाविद्यांजपतुवानवा॥४५॥
कीर्तयेन्नामसाहस्रमिदंमत्प्रीतयेसदा।
मत्प्रीत्यासकलान्कामांल्लभतेनात्रसंशयः॥४६॥
तस्मान्नामसहस्रंमेकीर्तयध्वंसदादरात्।
**श्रीहयग्रीवउवाच**
इतिश्रीललितेशानीशास्तिदेवान्सहानुगान्॥४७॥
तदाज्ञयातदारभ्यब्रह्मविष्णुमहेश्वराः।
शक्तयोमन्त्रणीमुख्याइदंनामसहस्रकम्॥४८॥
पठन्तिभक्त्यासततंललितापरितुष्टये।
तस्मादवश्यंभक्तेनकीर्तनीयमिदंमुने॥४९॥
आवश्यकत्वेहेतुस्तेमयाप्रोक्तोमुनीश्वर।
इदानींनामसाहस्रंवक्ष्यामिश्रद्धयाशृणु॥५०॥

**इति श्री ब्रह्माण्डपुराणे श्री हयग्रीवागस्त्यसंवादे**
**श्रीललितासहस्रनामपूर्वभागः ॥**

**संकल्पः**
शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।
प्राणायामम् ।।
ममोपात्त -------- परमेश्वरी प्रीत्यर्थं श्रीललिता महात्रिपुरसुन्दरी प्रसाद सिद्धिद्वाराम धर्मार्थकाममोक्ष चतुर्विदपुरुषार्थफल सिद्ध्यर्थं सर्वमंगल अवाप्त्यर्थंश्रीललितासहस्रनामस्तोत्र पारायणं / अर्चनं करिष्ये ।

**ऋष्यादि न्यासः**
अस्यश्रीललितासहस्रनामस्तोत्रमहामन्त्रस्यवशिन्यादयोवाग्देवताऋषयः।
अनुष्टुप्छन्दः।श्रीललितापरमेश्वरीदेवता।
ऐंबीजम्।सौःशक्तिः। क्लींकीलकम्।
श्रीललितामहात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे पारायणे / अर्चनेविनियोगः।

**।।करन्यासः।।**ऐंअङ्गुष्ठाभ्यांनमः।क्लींतर्जनीभ्यांनमः।सौःमध्यमाभ्यांनमः।ऐंअनामिकाभ्यांनमः।क्लींकनिष्ठिकाभ्यांनमः।सौःकरतलकरपृष्ठाभ्यांनमः।

**।।अङ्गन्यासः।।**ऐंहृदयायनमः।क्लींशिरसेस्वाहा।सौःशिखायैवषट्।
ऐंकवचायहुं।क्लींनेत्रत्रयायवौषट्।सौःअस्त्रायफट्।
भूर्भवस्सुवरोमितिदिग्बन्धः।

*** पञ्चदश्युपदिष्टाः पञ्चदशीकूटत्रयेण न्यसेत् ।**

**।।ध्यानम्।।**
सिन्दूरारुणविग्रहांत्रिनयनांमाणिक्यमौलिस्फुरत्
तारानायकशेखरांस्मितमुखीं आपीनवक्षोरुहाम्।
पाणिभ्यामलिपूर्णरत्नचषकंरक्तोत्पलंबिभ्रतीं
सौम्यांरत्नघटस्थरक्तचरणांध्यायेत्परामम्बिकाम्।।



अरुणांकरुणातरङ्गिताक्षींधृतपाशाङ्कुशपुष्पबाणचापाम्।
अणिमादिभिरावृतांमयूखैरहमित्येवविभावयेभवानीम्।।

ध्यायेत्पद्मासनस्थांविकसितवदनांपद्मपत्रायताक्षीं
हेमाभांपीतवस्त्रांकरकलितलसद्धेमपद्मांवराङ्गीम्।
सर्वालङ्कारयुक्तांसततमभयदांभक्तनम्रांभवानीं
श्रीविद्यांशान्तमूर्तिंसकलसुरनुतांसर्वसम्पत्प्रदात्रीम्।।

सकुङ्कुमविलेपनामलिकचुम्बिकस्तूरिकां
समन्दहसितेक्षणांसशरचापपाशाङ्कुशाम्।
अशेषजनमोहिनीमरुणमाल्यभूषाम्बरां
जपाकुसुमभासुरांजपविधौस्मरेदम्बिकाम्।।

**लमित्यादिपञ्चपूजा**
``लं'' पृथिवीतत्त्वात्मिकायैगन्धंकल्पयामि।
``हं'' आकाशतत्त्वात्मिकायैपुष्पंकल्पयामि।
``यं'' वायुतत्त्वात्मिकायैधूपंकल्पयामि।
``रं'' वह्नितत्त्वात्मिकायैदीपंकल्पयामि।
``वं'' अमृततत्त्वामिकायैअमृतंमहानैवेद्यंकल्पयामि।
``सं'' सर्वतत्त्वात्मिकायैसर्वोपचारपूजांकल्पयामि।

# ॥श्रीललितासहस्रनामस्तोत्रम्॥

**श्रीमातुरवतारः**

श्रीमाताश्रीमहाराज्ञीश्रीमत्सिंहासनेश्वरी।
चिदग्निकुण्डसम्भूतादेवकार्यसमुद्यता॥१॥
उद्यद्भानुसहस्राभाचतुर्बाहुसमन्विता।
रागस्वरूपपाशाढ्याक्रोधाकाराङ्कुशोज्ज्वला॥२॥
मनोरूपेक्षुकोदण्डापञ्चतन्मात्रसायका।
निजारुणप्रभापूरमज्जद्ब्रह्माण्डमण्डला॥३॥

**केशादिपादवर्णनम्**

चम्पकाशोकपुन्नागसौगन्धिकलसत्कचा।
कुरुविन्दमणिश्रेणीकनत्कोटीरमण्डिता॥४॥
अष्टमीचन्द्रविभ्राजदलिकस्थलशोभिता।
मुखचन्द्रकलङ्काभमृगनाभिविशेषका॥५॥
वदनस्मरमाङ्गल्यगृहतोरणचिल्लिका।
वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचना॥६॥
नवचम्पकपुष्पाभनासादण्डविराजिता।
ताराकान्तितिरस्कारिनासाभरणभासुरा॥७॥
कदम्बमञ्जरीक्लृप्तकर्णपूरमनोहरा।
ताटङ्कयुगलीभूततपनोडुपमण्डला॥८॥
पद्मरागशिलादर्शपरिभाविकपोलभूः।
नवविद्रुमबिम्बश्रीन्यक्कारिरदनच्छदा॥९॥
शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्ज्वला।
कर्पूरवीटिकामोदसमाकर्षिदिगन्तरा॥१०॥



निजसल्लापमाधुर्यविनिर्भर्त्सितकच्छपी।
मन्दस्मितप्रभापूरमज्जत्कामेशमानसा॥११॥
अनाकलितसादृश्यचिबुकश्रीविराजिता।
कामेशबद्धमाङ्गल्यसूत्रशोभितकन्धरा॥१२॥
कनकाङ्गदकेयूरकमनीयभुजान्विता।
रत्नग्रैवेयचिन्ताकलोलमुक्ताफलान्विता॥१३॥
कामेश्वरप्रेमरत्नमणिप्रतिपणस्तनी।
नाभ्यालवालरोमालिलताफलकुचद्वयी॥१४॥
लक्ष्यरोमलताधारतासमुन्नेयमध्यमा।
स्तनभारदलन्मध्यपट्टबन्धवलित्रया॥१५॥
अरुणारुणकौसुम्भवस्त्रभास्वत्कटीतटी।
रत्नकिङ्किणिकारम्यरशनादामभूषिता॥१६॥
कामेशज्ञातसौभाग्यमार्दवोरुद्वयान्विता।
माणिक्यमुकुटाकारजानुद्वयविराजिता॥१७॥
इन्द्रगोपपरिक्षिप्तस्मरतूणाभजङ्घिका।
गूढगुल्फाकूर्मपृष्ठजयिष्णुप्रपदान्विता॥१८॥
नखदीधितिसञ्छन्ननमज्जनतमोगुणा।
पदद्वयप्रभाजालपराकृतसरोरुहा॥१९॥
सिञ्जानमणिमञ्जीरमण्डितश्रीपदाम्बुजा।
मरालीमन्दगमनामहालावण्यशेवधिः॥२०॥
सर्वारुणाऽनवद्याङ्गीसर्वाभरणभूषिता।
शिवकामेश्वराङ्कस्थाशिवास्वाधीनवल्लभा॥२१॥

**श्रीनगरवर्णनम्**

सुमेरुमध्यशृङ्गस्थाश्रीमन्नगरनायिका।
चिन्तामणिगृहान्तस्थापञ्चब्रह्मासनस्थिता॥२२॥
महापद्माटवीसंस्थाकदम्बवनवासिनी।
सुधासागरमध्यस्थाकामाक्षीकामदायिनी॥२३॥

**भण्डासुरवधः**

देवर्षिगणसङ्घातस्तूयमानात्मवैभवा।
भण्डासुरवधोद्युक्तशक्तिसेनासमन्विता॥२४॥
सम्पत्करीसमारूढसिन्धुरव्रजसेविता।
अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृता॥२५॥
चक्रराजरथारूढसर्वायुधपरिष्कृता।
गेयचक्ररथारूढमन्त्रिणीपरिसेविता॥२६॥
किरिचक्ररथारूढदण्डनाथापुरस्कृता
ज्वालामालिनिकाक्षिप्तवह्निप्राकारमध्यगा॥२७॥
भण्डसैन्यवधोद्युक्तशक्तिविक्रमहर्षिता।
नित्यापराक्रमाटोपनिरीक्षणसमुत्सुका॥२८॥
भण्डपुत्रवधोद्युक्तबालाविक्रमनन्दिता।
मन्त्रिण्यम्बाविरचितविशुक्रवधतोषिता॥२९॥
विषङ्गप्राणहरणवाराहीवीर्यनन्दिता।
कामेश्वरमुखालोककल्पितश्रीगणेश्वरा॥३०॥
महागणेशनिर्भिन्नविघ्नयन्त्रप्रहर्षिता।
भण्डासुरेन्द्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिणी॥३१॥
कराङ्गुलिनखोत्पन्ननारायणदशाकृतिः।
महापाशुपतास्त्राग्निनिर्दग्धासुरसैनिका॥३२॥



कामेश्वरास्त्रनिर्दग्धसभण्डासुरशून्यका।
ब्रह्मोपेन्द्रमहेन्द्रादिदेवसंस्तुतवैभवा॥३३॥

**मन्त्ररूपः**

हरनेत्राग्निसन्दग्धकामसञ्जीवनौषधिः।
श्रीमद्वाग्भवकूटैकस्वरूपमुखपङ्कजा॥३४॥
कण्ठाधःकटिपर्यन्तमध्यकूटस्वरूपिणी।
शक्तिकूटैकतापन्नकट्यधोभागधारिणी॥३५॥
मूलमन्त्रात्मिकामूलकूटत्रयकलेबरा।
कुलामृतैकरसिकाकुलसङ्केतपालिनी॥३६॥
कुलाङ्गनाकुलान्तस्थाकौलिनीकुलयोगिनी।
अकुलासमयान्तस्थासमयाचारतत्परा॥३७॥
मूलाधारैकनिलयाब्रह्मग्रन्थिविभेदिनी।
मणिपूरान्तरुदिताविष्णुग्रन्थिविभेदिनी॥३८॥
आज्ञाचक्रान्तरालस्थारुद्रग्रन्थिविभेदिनी।
सहस्राराम्बुजारूढासुधासाराभिवर्षिणी॥३९॥
तडिल्लतासमरुचिःषट्चक्रोपरिसंस्थिता।
महासक्तिःकुण्डलिनीबिसतन्तुतनीयसी॥४०॥

**भक्तानुग्रहः**

भवानीभावनागम्याभवानन्दफलप्रदा।
भद्रप्रियाभद्रमूर्तिर्भक्तसौभाग्यदायिनी॥४१॥
भक्तिप्रियाभक्तिगम्याभक्तिवश्याभयापहा।
शाम्भवीशारदाराध्याशर्वाणीशर्मदायिनी॥४२॥
शाङ्करीश्रीकरीसाध्वीशरच्चन्द्रनिभानना।
शातोदरीशान्तिमतीनिराधारानिरञ्जना॥४३॥

**निर्गुणोपासना**

निर्लेपानिर्मलानित्यानिष्प्राकृता निराकुला।
निर्गुणानिष्कलाशान्तानिष्कामानिरुपप्लवा॥४४॥
नित्यमुक्तानिर्विकाराशुभाकारानिराश्रया।
नित्यशुद्धानित्यबुद्धानिरवद्यानिरन्तरा॥४५॥
निष्कारणानिष्कलङ्कानिरुपाधिर्निरीश्वरा।
नीरोगारोगमथनीसुदेहाशुभदायिनी॥४६॥
निश्चिन्तानिरहङ्कारानिर्मोहामोहनाशिनी।
निर्ममाममताहन्त्रीनिष्पापापापनाशिनी॥४७॥
निष्क्रोधाक्रोधशमनीनिर्लोभालोभनाशिनी।
निःसंशयासंशयघ्नीनिर्भयाभयनाशिनी॥४८॥
निर्विकल्पानिराबाधानिर्भेदाभेदनाशिनी।
निर्नाशामृत्युमथनीसक्रिया सपरिग्रहा॥४९॥
निस्तुलानीलचिकुरा निरापाया निरत्यया।
दुर्लभादुर्गमादुर्गादुःखहन्त्रीसुखप्रदा॥५०॥

**सगुणोपासना**

दुष्टदूरादुराचारशमनीदोषवर्जिता।
सर्वज्ञासान्द्रकरुणासमानाधिकवर्जिता॥५१॥
सर्वशक्तिमयीसर्वमङ्गलासद्गतिप्रदा।
सर्वेश्वरीसर्वमयीसर्वमन्त्रस्वरूपिणी॥५२॥
सर्वयन्त्रात्मिकासर्वतन्त्ररूपामनोन्मनी।
माहेश्वरीमहादेवीमहालक्ष्मीर्मृडप्रिया॥५३॥
महारूपामहापूज्यामहापातकनाशिनी।
महामायामहासत्त्वामहाशक्तिर्महारतिः॥५४॥



महाभोगामहैश्वर्यामहावीर्यामहाबला।
महाबुद्धिर्महासिद्धिर्महायोगेश्वरेश्वरी॥५५॥
महातन्त्रामहामन्त्रामहायन्त्रामहासना।
महायागक्रमाराध्यामहाभैरवपूजिता॥५६॥
महेश्वरमहाकल्पमहाताण्डवसाक्षिणी।
महाकामेशमहिषीमहात्रिपुरसुन्दरी॥५७॥
चतुःषष्ट्युपचाराढ्याचतुःषष्टिकलामयी।
महाचतुःषष्टिकोटियोगिनीगणसेविता॥५८॥
मनुविद्याचन्द्रविद्याचन्द्रमण्डलमध्यगा।
चारुरूपाचारुहासाचारुचन्द्रकलाधरा॥५९॥
चराचरजगन्नाथाचक्रराज-निकेतना।
पार्वतीपद्मनयनापद्मरागसमप्रभा॥६०॥

**पञ्चब्रह्मस्वरूपः**

पञ्चप्रेतासनासीनापञ्चब्रह्मस्वरूपिणी।
चिन्मयीपरमानन्दाविज्ञानघनरूपिणी॥६१॥
ध्यानध्यातृध्येयरूपाधर्माधर्मविवर्जिता।
विश्वरूपाजागरिणीस्वपन्तीतैजसात्मिका॥६२॥
सुप्ताप्राज्ञात्मिकातुर्यासर्वावस्थाविवर्जिता।
सृष्टिकर्त्रीब्रह्मरूपागोप्त्रीगोविन्दरूपिणी॥६३॥
संहारिणीरुद्ररूपातिरोधानकरीश्वरी।
सदाशिवाऽनुग्रहदापञ्चकृत्यपरायणा॥६४॥
भानुमण्डलमध्यस्थाभैरवीभगमालिनी।
पद्मासनाभगवतीपद्मनाभसहोदरी॥६५॥

उन्मेषनिमिषोत्पन्नविपन्नभुवनावली।
सहस्रशीर्षवदनासहस्राक्षीसहस्रपात्॥६६॥
आब्रह्मकीटजननीवर्णाश्रमविधायिनी।
निजाज्ञारूपनिगमापुण्यापुण्यफलप्रदा॥६७॥
श्रुतिसीमन्तसिन्दूरीकृतपादाब्जधूलिका।
सकलागमसन्दोहशुक्तिसम्पुटमौक्तिका॥६८॥
पुरुषार्थप्रदापूर्णाभोगिनीभुवनेश्वरी।
अम्बिकाऽनादिनिधनाहरिब्रह्मेन्द्रसेविता॥६९॥
नारायणीनादरूपानादोपासनतत्परा।
ह्रीङ्कारीह्रीमतीहृद्याहेयोपादेयवर्जिता॥७०॥
राजराजार्चिताराज्ञीरम्याराजीवलोचना।
रञ्जनीरमणीरस्यारणत्किङ्किणिमेखला॥७१॥
रमाराकेन्दुवदनारतिरूपारतिप्रिया।
रक्षाकरीराक्षसघ्नीरामारमणलम्पटा॥७२॥
काम्याकामकलारूपाकदम्बकुसुमप्रिया।
कल्याणीजगतीकन्दाकरुणारससागरा॥७३॥
कलावतीकलालापाकान्ताकादम्बरीप्रिया।
वरदावामनयनावारुणीमदविह्वला॥७४॥
विश्वाधिकावेदवेद्याविन्ध्याचलनिवासिनी।
विधात्रीवेदजननीविष्णुमायाविलासिनी॥७५॥

**क्षेत्रक्षेत्रज्ञरूप:**

क्षेत्रस्वरूपाक्षेत्रेशीक्षेत्रक्षेत्रज्ञपालिनी।
क्षयवृद्धिविनिर्मुक्ताक्षेत्रपालसमर्चिता॥७६॥

विजयाविमलावन्द्यावन्दारुजनवत्सला।
वाग्वादिनीवामकेशीवह्निमण्डलवासिनी॥७७॥
भक्तिमत्कल्पलतिकापशुपाशविमोचिनी।
संहृताशेषपाषण्डासदाचारप्रवर्तिका॥७८॥
तापत्रयाग्निसन्तप्तसमाह्लादनचन्द्रिका।
तरुणीतापसाराध्यातनुमध्यातमोऽपहा॥७९॥
चितिस्तत्पदलक्ष्यार्थाचिदेकरसरूपिणी।
स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसन्ततिः॥८०॥

**पीठानि अंगदेवताश्च**

पराप्रत्यक्चितीरूपापश्यन्तीपरदेवता।
मध्यमावैखरीरूपाभक्तमानसहंसिका॥८१॥
कामेश्वरप्राणनाडीकृतज्ञाकामपूजिता।
शृङ्गाररससम्पूर्णाजयाजालन्धरस्थिता॥८२॥
ओड्याणपीठनिलयाबिन्दुमण्डलवासिनी।
रहोयागक्रमाराध्यारहस्तर्पणतर्पिता॥८३॥
सद्यःप्रसादिनीविश्वसाक्षिणीसाक्षिवर्जिता।
षडङ्गदेवतायुक्तासाड्गुण्यपरिपूरिता॥८४॥
नित्यक्लिन्नानिरुपमानित्यानन्दप्रदायिनी।
नित्याषोडशिकारूपाश्रीकण्ठार्धशरीरिणी॥८५॥
प्रभावतीप्रभारूपाप्रसिद्धापरमेश्वरी।
मूलप्रकृतिरव्यक्ताव्यक्ताव्यक्तस्वरूपिणी॥८६॥
व्यापिनीविविधाकाराविद्याविद्या-स्वरूपिणी।
महाकामेशनयनकुमुदाह्लादकौमुदी॥८७॥

भक्तहार्दतमोभेदभानुमद्भानुसन्ततिः।
शिवदूतीशिवाराध्याशिवमूर्तिःशिवङ्करी॥८८॥
शिवप्रियाशिवपराशिष्टेष्टाशिष्टपूजिता।
अप्रमेयास्वप्रकाशामनोवाचामगोचरा॥८९॥
चिच्छक्तिश्चेतनारूपाजडशक्तिर्जडात्मिका।
गायत्रीव्याहृतिःसन्ध्याद्विजबृन्दनिषेविता॥९०॥
तत्त्वासनातत्त्वमयीपञ्चकोशान्तरस्थिता।
निस्सीम महिमानित्ययौवनामदशालिनी॥९१॥
मदघूर्णितरक्ताक्षीमदपाटलगण्डभूः।
चन्दनद्रवदिग्धाङ्गीचाम्पेयकुसुमप्रिया॥९२॥
कुशलाकोमलाकाराकुरुकुल्लाकुलेश्वरी।
कुलकुण्डालयाकौलमार्गतत्परसेविता॥९३॥
कुमारगणनाथाम्बातुष्टिःपुष्टिर्मतिर्धृतिः।
शान्तिःस्वस्तिमतीकान्तिर्नन्दिनीविघ्ननाशिनी॥९४॥
तेजोवतीत्रिनयनालोलाक्षीकामरूपिणी।
मालिनीहंसिनीमातामलयाचलवासिनी॥९५॥
सुमुखीनलिनीसुभ्रूःशोभनासुरनायिका।
कालकण्ठीकान्तिमतीक्षोभिणीसूक्ष्मरूपिणी॥९६॥
वज्रेश्वरीवामदेवीवयोऽवस्थाविवर्जिता।
सिद्धेश्वरीसिद्धविद्यासिद्धमातायशस्विनी॥९७॥
**योगिनी न्यास:**
विशुद्धिचक्रनिलयाऽऽरक्तवर्णात्रिलोचना।
खट्वाङ्गादिप्रहरणावदनैकसमन्विता॥९८॥



पायसान्नप्रियात्वक्स्थापशुलोकभयङ्करी।
अमृतादि सर्वशक्तिसंवृताडाकिनीश्वरी॥९९॥
अनाहताब्जनिलयाश्यामाभावदनद्वया।
दंष्ट्रोज्ज्वलाऽक्षमालादिधरारुधिरसंस्थिता॥१००॥
कालरात्र्यादिशक्त्यौघवृतास्निग्धौदनप्रिया।
महावीरेन्द्रवरदाराकिण्यम्बास्वरूपिणी॥१०१॥
मणिपूराब्जनिलयावदनत्रयसंयुता।
वज्रादिकायुधोपेताडामर्यादिभिरावृता॥१०२॥
रक्तवर्णामांसनिष्ठागुडान्नप्रीतमानसा।
समस्तभक्तसुखदालाकिन्यम्बास्वरूपिणी॥१०३॥
स्वाधिष्ठानाम्बुजगताचतुर्वक्त्रमनोहरा।
शूलाद्यायुधसम्पन्नापीतवर्णाऽतिगर्विता॥१०४॥
मेदोनिष्ठामधुप्रीताबन्धिन्यादिसमन्विता।
दध्यन्नासक्तहृदयाकाकिनीरूपधारिणी॥१०५॥
मूलाधाराम्बुजारूढापञ्चवक्त्राऽस्थिसंस्थिता।
अङ्कुशादिप्रहरणावरदादिनिषेविता॥१०६॥
मुद्गौदनासक्तचित्तासाकिन्यम्बास्वरूपिणी।
आज्ञाचक्राब्जनिलयाशुक्लवर्णाषडानना॥१०७॥
मज्जासंस्थाहंसवतीमुख्यशक्तिसमन्विता।
हरिद्रान्नैकरसिकाहाकिनीरूपधारिणी॥१०८॥
सहस्रदलपद्मस्थासर्ववर्णोपशोभिता।
सर्वायुधधराशुक्लसंस्थितासर्वतोमुखी॥१०९॥

**विभूतिविस्तारः**

सर्वौदनप्रीतचित्तायाकिन्यम्बास्वरूपिणी।
स्वाहास्वधाऽमतिर्मेधाश्रुतिःस्मृतिरनुत्तमा॥११०॥
पुण्यकीर्तिःपुण्यलभ्यापुण्यश्रवणकीर्तना।
पुलोमजार्चिताबन्धमोचनीबर्बरालका॥१११॥
विमर्शरूपिणीविद्यावियदादिजगत्प्रसूः।
सर्वव्याधिप्रशमनीसर्वमृत्युनिवारिणी॥११२॥
अग्रगण्याऽचिन्त्यरूपाकलिकल्मषनाशिनी।
कात्यायनीकालहन्त्रीकमलाक्षनिषेविता॥११३॥
ताम्बूलपूरितमुखीदाडिमीकुसुमप्रभा।
मृगाक्षीमोहिनीमुख्यामृडानीमित्ररूपिणी॥११४॥
नित्यतृप्ताभक्तनिधिर्नियन्त्रीनिखिलेश्वरी।
वामादिवासनालभ्यामहाप्रलयसाक्षिणी॥११५॥
पराशक्तिःपरानिष्ठाआनन्दघनरूपिणी।
माध्वीपानालसामत्तामातृकावर्णरूपिणी॥११६॥
महाकैलासनिलयामृणालमृदुदोर्लता।
महनीयादयामूर्तिर्महासाम्राज्यशालिनी॥११७॥
आत्मविद्यामहाविद्यात्रिकूटाकामकोटिका।
श्रीकामसेविता विद्या श्रीविद्या षोडशाक्षरी॥११८॥
कटाक्षकिङ्करीभूतकमलाकोटिसेविता।
शिरःस्थिताचन्द्रनिभाभालस्थेन्द्रधनुःप्रभा॥११९॥
हृदयस्थारविप्रख्यात्रिकोणान्तरदीपिका।
दाक्षायणीदैत्यहन्त्रीदक्षयज्ञविनाशिनी॥१२०॥



दरान्दोलितदीर्घाक्षीदरहासोज्ज्वलन्मुखी।
गुरुमूर्तिर्गुणनिधिर्गोमातागुहजन्मभूः॥१२१॥
देवेशीदण्डनीतिस्थादहराकाशरूपिणी।
प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजिता॥१२२॥
कलात्मिकाकलानाथाकाव्यालापविनोदिनी।
सचामररमावाणीसव्यदक्षिणसेविता॥१२३॥
आदिशक्तिरमेयाऽऽत्मापरमापावनाकृतिः।
अनेककोटिब्रह्माण्डजननीदिव्यविग्रहा॥१२४॥
क्लीङ्कारीकेवलागुह्याकैवल्यपददायिनी।
त्रिपुरात्रिजगद्वन्द्यात्रिमूर्तिस्त्रिदशेश्वरी॥१२५॥
त्र्यक्षरीदिव्यगन्धाढ्यासिन्दूरतिलकाञ्चिता।
उमाशैलेन्द्रतनयागौरीगन्धर्वसेविता॥१२६॥
विश्वगर्भास्वर्णगर्भाऽवरदावागधीश्वरी।
ध्यानगम्याऽपरिच्छेद्याज्ञानदाज्ञानविग्रहा॥१२७॥
सर्ववेदान्तसंवेद्यासत्यानन्दस्वरूपिणी।
लोपामुद्रार्चितालीलाक्लृप्तब्रह्माण्डमण्डला॥१२८॥
अदृश्यादृश्यरहिताविज्ञात्रीवेद्यवर्जिता।
योगिनीयोगदायोग्यायोगानन्दायुगन्धरा॥१२९॥
इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी।
सर्वाधारासुप्रतिष्ठासदसद्रूपधारिणी॥१३०॥
अष्टमूर्तिरजाजैत्रीलोकयात्राविधायिनी।
एकाकिनीभूमरूपापराप्रकृतिरूपिणी॥१३१॥
अन्नदावसुदावृद्धाब्रह्मात्मैक्यस्वरूपिणी।
बृहतीब्राह्मणीब्राह्मीब्रह्मानन्दाबलिप्रिया॥१३२॥

भाषारूपाबृहत्सेनाभवरूपविलासिनी।
सुखाराध्याशुभकरीशोभनासुलभागतिः॥१३३॥
राजराजेश्वरीराज्यदायिनीराज्यवल्लभा।
राजत्कृपाराजपीठनिवेशितनिजाश्रिता॥१३४॥
राज्यलक्ष्मीःकोशनाथाचतुरङ्गबलेश्वरी।
साम्राज्यदायिनीसत्यसन्धासागरमेखला॥१३५॥
दीक्षितादैत्यशमनीसर्वलोकवशङ्करी।
सर्वार्थदात्रीसावित्रीसच्चिदानन्दरूपिणी॥१३६॥
देशकालापरिच्छिन्नासर्वगासर्वमोहिनी।
सरस्वतीशास्त्रमयीगुहाम्बागुह्यरूपिणी॥१३७॥
सर्वोपाधिविनिर्मुक्तासदाशिवपतिव्रता।
सम्प्रदायेश्वरीसाध्वीगुरुमण्डलरूपिणी॥१३८॥
कुलोत्तीर्णाभगाराध्यामायामधुमतीमही।
गणाम्बागुह्यकाराध्याकोमलाङ्गीगुरुप्रिया॥१३९॥
स्वतन्त्रासर्वतन्त्रेशीदक्षिणामूर्तिरूपिणी।
सनकादिसमाराध्याशिवज्ञानप्रदायिनी॥१४०॥
चित्कलाऽऽनन्दकलिकाप्रेमरूपाप्रियङ्करी।
नामपारायणप्रीतानन्दिविद्यानटेश्वरी॥१४१॥
सत्याजगदधिष्ठानामुक्तिदामुक्तिरूपिणी।
लास्यप्रियालयकरीलज्जारम्भादिवन्दिता॥१४२॥
जन्मदावसुधावृष्टिःपापारण्यदवानला।
दौर्भाग्यतूलवातूलाजराध्वान्तरविप्रभा॥१४३॥
भाग्याब्धिचन्द्रिकाभक्तचित्तकेकिघनाघना।
महाकालप्राणसखिमहादेवशवस्थिता॥१४४॥



महेश्वरीमहाकालीमहाग्रासामहाशना।
अपर्णाचण्डिकाचण्डमुण्डासुरनिषूदिनी॥१४५॥
क्षराक्षरात्मिकासर्वलोकेशीविश्वधारिणी।
त्रिवर्गदात्रीसुभगात्र्यम्बकात्रिगुणात्मिका॥१४६॥
स्वर्गापवर्गदाशुद्धाजपापुष्पनिभाकृतिः।
ओजोवतीद्युतिधरायज्ञरूपाप्रियव्रता॥१४७॥
दुराराध्यादुराधर्षापाटलीकुसुमप्रिया।
महतीमेरुनिलयामन्दारकुसुमप्रिया॥१४८॥
वीराराध्याविराड्रूपाविरजाविश्वतोमुखी।
प्रत्यग्रूपापराकाशाप्राणदाप्राणरूपिणी॥१४९॥
मार्तण्डभैरवाराध्यामन्त्रिणीन्यस्तराज्यधूः।
त्रिपुरेशीजयत्सेनानिस्त्रैगुण्यापरापरा॥१५०॥
सत्यज्ञानानन्दरूपासामरस्यपरायणा।
कपर्दिनीकलामालाकामधुक्कामरूपिणी॥१५१॥
कलानिधिःकाव्यकलारसज्ञारसशेवधिः।
पुष्टापुरातनापूज्यापुष्करापुष्करेक्षणा॥१५२॥
परञ्ज्योतिःपरन्धामपरमाणुःपरात्परा।
पाशहस्तापाशहन्त्रीपरमन्त्रविभेदिनी॥१५३॥
मूर्ताऽमूर्ताऽनित्यतृप्तामुनिमानसहंसिका।
सत्यव्रतासत्यरूपासर्वान्तर्यामिनीसती॥१५४॥
ब्रह्माणीब्रह्मजननीबहुरूपाबुधार्चिता।
प्रसवित्रीप्रचण्डाऽऽज्ञाप्रतिष्ठाप्रकटाकृतिः॥१५५॥
प्राणेश्वरीप्राणदात्रीपञ्चाशत्पीठरूपिणी।
विशृङ्खलाविविक्तस्थावीरमातावियत्प्रसूः॥१५६॥

मुकुन्दामुक्तिनिलयामूलविग्रहरूपिणी।
भावज्ञाभवजननिभवचक्रप्रवर्तिनी॥१५७॥
छन्दःसाराशास्त्रसारामन्त्रसारातलोदरी।
उदारकीर्तिरुद्दामवैभवावर्णरूपिणी॥१५८॥
जन्ममृत्युजरातप्तजनविश्रान्तिदायिनी।
सर्ववेदप्रतीपाद्याशान्त्यतीतकलात्मिका॥१५९॥
गम्भीरागगनान्तस्थागर्वितागानलोलुपा।
कल्पनारहिताकाष्ठाऽकान्ताकान्तार्धविग्रहा॥१६०॥
कार्यकारणनिर्मुक्ताकामकेलितरङ्गिता।
कनत्कनकताटङ्कालीलाविग्रहधारिणी॥१६१॥
अजाक्षयविनिर्मुक्तामुग्धाक्षिप्रप्रसादिनी।
अन्तर्मुखसमाराध्याबहिर्मुखसुदुर्लभा॥१६२॥
त्रयीत्रिवर्गनिलयात्रिस्थात्रिपुरमालिनी।
निरामयानिरालम्बास्वात्मारामासुधासृतिः॥१६३॥
पाषण्डपङ्कर्मग्नसमुद्धरणपण्डिता।
यज्ञप्रियायज्ञकर्त्रीयजमानस्वरूपिणी॥१६४॥
धर्माधाराधनाध्यक्षाधनधान्यविवर्धिनी।
विप्रप्रियाविप्ररूपाविश्वभ्रमणकारिणी॥१६५॥
विश्वग्रासाविद्रुमाभावैष्णवीविष्णुरूपिणी।
अयोनिर्योनिनिलयाकूटस्थाकुलरूपिणी॥१६६॥
वीरगोष्ठीप्रियावीरानैष्कर्म्यानादरूपिणी।
विज्ञानकलनाकल्याविदग्धाबैन्दवासना॥१६७॥
तत्त्वाधिकातत्त्वमयीतत्त्वमर्थस्वरूपिणी।
सामगानप्रियासौम्यासदाशिवकुटुम्बिनी॥१६८॥



सव्यापसव्यमार्गस्थासर्वापद्विनिवारिणी।
स्वस्थास्वभावमधुराधीराधीरसमर्चिता॥१६९॥
चैतन्यार्घ्यसमाराध्याचैतन्यकुसुमप्रिया।
सदोदितासदातुष्टातरुणादित्यपाटला॥१७०॥
दक्षिणादक्षिणाराध्यादरस्मेरमुखाम्बुजा।
कौलिनीकेवलाऽनर्घ्यकैवल्यपददायिनी॥१७१॥
स्तोत्रप्रियास्तुतिमतीश्रुतिसंस्तुतवैभवा।
मनस्विनीमानवतीमहेशीमङ्गलाकृतिः॥१७२॥
विश्वमाताजगद्धात्रीविशालाक्षीसुरागिणी।
प्रगल्भापरमोदारापरामोदामनोमयी॥१७३॥
व्योमकेशीविमानस्थावज्रिणीवामकेश्वरी।
पञ्चयज्ञप्रियापञ्चप्रेतमञ्चाधिशायिनी॥१७४॥
पञ्चमीपञ्चभूतेशीपञ्चसङ्ख्योपचारिणी।
शाश्वतीशाश्वतैश्वर्याशर्मदाशम्भुमोहिनी॥१७५॥
धराधरसुताधन्याधर्मिणीधर्मवर्धिनी।
लोकातीतागुणातीतासर्वातीताशमात्मिका॥१७६॥
बन्धूककुसुमप्रख्याबालालीलाविनोदिनी।
सुमङ्गलीसुखकरीसुवेषाढ्यासुवासिनी॥१७७॥
सुवासिन्यर्चनप्रीताऽऽशोभनाशुद्धमानसा।
बिन्दुतर्पणसन्तुष्टापूर्वजात्रिपुराम्बिका॥१७८॥
दशमुद्रासमाराध्यात्रिपुराश्रीवशङ्करी।
ज्ञानमुद्राज्ञानगम्याज्ञानज्ञेयस्वरूपिणी॥१७९॥
योनिमुद्रात्रिखण्डेशीत्रिगुणाम्बात्रिकोणगा।
अनघाऽद्भुतचारित्रावाञ्छितार्थप्रदायिनी॥१८०॥

**शिवशक्त्यैक्यरूपः**

अभ्यासातिशयज्ञाताषडध्वातीतरूपिणी।

अव्याजकरुणामूर्तिरज्ञानध्वान्तदीपिका॥१८१॥

आबालगोपविदितासर्वानुल्लङ्घ्यशासना।

श्रीचक्रराजनिलयाश्रीमत्त्रिपुरसुन्दरी॥१८२॥

श्रीशिवाशिवशक्त्यैक्यरूपिणीललिताम्बिका।

एवंश्रीललितादेव्यानाम्नांसाहस्रकंजगुः॥

**॥इतिश्रीब्रह्माण्डपुराणेउत्तरखण्डेश्रीहयग्रीवागस्त्यसंवादेश्रीललितासहस्रनामस्तोत्रंसम्पूर्णम्॥**

**॥उत्तराङ्गन्यासः॥**

ऐंहृदयायनमः।क्लींशिरसेस्वाहा।सौःशिखायैवषट्।ऐंकवचायहुं।क्लींनेत्रत्रयायवौषट्।सौःअस्त्रायफट्।

भूर्भवस्सुवरोमितिदिक् विमोकः।

**॥ध्यानम्॥**

**॥लमित्यादिपञ्चपूजा॥**

**समर्पणम्**

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।

सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मयि स्थिरा ॥



**फलश्रुतिः**

इत्येवंनामसाहस्रंकथितंतेघटोद्भव।

रहस्यानांरहस्यंचललिताप्रीतिदायकम्॥१॥

अनेनसदृशंस्तोत्रंनभूतंनभविष्यति।

सर्वरोगप्रशमनंसर्वसम्पत्प्रवर्धनम्॥२॥

सर्वापमृत्युशमनंकालमृत्युनिवारणम्।

सर्वज्वरार्तिशमनंदीर्घायुष्यप्रदायकम्॥३॥

पुत्रप्रदमपुत्राणांपुरुषार्थप्रदायकम्।

इदंविशेषाच्छ्रीदेव्याःस्तोत्रंप्रीतिविधायकम्॥४॥

जपेन्नित्यंप्रयत्नेनललितोपास्तितत्परः।

प्रातःस्नात्वाविधानेनसन्ध्याकर्मसमाप्यच॥५॥

पूजागृहंततोगत्वाचक्रराजंसमर्चयेत्।

विद्यांजपेत्सहस्रंवात्रिशतंशतमेववा॥६॥

रहस्यनामसाहस्रमिदंपश्चात्पठेन्नरः।

जन्ममध्येसकृच्चापियएतत्पठतेसुधीः॥७॥

तस्यपुण्यफलंवक्ष्येशृणुत्वंकुम्भसम्भव।

गङ्गादिसर्वतीर्थेषुयःस्नायात्कोटिजन्मसु॥८॥

कोटिलिङ्गप्रतिष्ठांचयःकुर्यादविमुक्तके।

कुरुक्षेत्रेतुयोदद्यात्कोटिवारंरविग्रहे॥९॥

कोटिंसौवर्णभाराणांश्रोत्रियेषुद्विजन्मसु।

यःकोटिंहयमेधानामाहरेद्गङ्गरोधसि॥१०॥

आचरेत्कूपकोटीर्योनिर्जलेमरुभूतले।

दुर्भिक्षेयःप्रतिदिनंकोटिब्राह्मणभोजनम्॥११॥

श्रद्धयापरयाकुर्यात्सहस्रपरिवत्सरान्।
तत्पुण्यंकोटिगुणितंलभेत्पुण्यमनुत्तमम्॥१२॥
रहस्यनामसाहस्रेनाम्नोऽप्येकस्यकीर्तनात्।
रहस्यनामसाहस्रेनामैकमपियःपठेत्॥१३॥
तस्यपापानिनश्यन्तिमहान्त्यपिनसंशयः।
नित्यकर्माननुष्ठानान्निषिद्धकरणादपि॥१४॥
यत्पापंजायतेपुंसांतत्सर्वंनश्यतिध्रुवम्।
बहुनात्रकिमुक्तेनशृणुत्वंकुम्भसम्भव॥१५॥
अत्रैकनाम्नोयाशक्तिःपातकानांनिवर्तने।
तन्निवर्त्यमघंकर्तुंनालंलोकाश्चतुर्दश॥१६॥
यस्त्यक्त्वानामसाहस्रंपापहानिमभीप्सति।
सहिशीतनिवृत्यर्थंहिमशैलंनिषेवते॥१७॥
भक्तोयःकीर्तयेन्नित्यमिदंनामसहस्रकम्।
तस्मैश्रीललितादेवीप्रीताऽभीष्टंप्रयच्छति॥१८॥
अकीर्तयन्निदंस्तोत्रंकथंभक्तोभविष्यति।
नित्यंसङ्कीर्तनाशक्तःकीर्तयेत्पुण्यवासरे॥१९॥
संक्रान्तौविषुवेचैवस्वजन्मत्रितयेऽयने।
नवम्यांवाचतुर्दश्यांसितायांशुक्रवासरे॥२०॥
कीर्तयेन्नामसाहस्रंपौर्णमास्यांविशेषतः।
पौर्णमास्यांचन्द्रबिम्बेध्यात्वाश्रीललिताम्बिकाम्॥२१॥
पञ्चोपचारैःसम्पूज्यपठेन्नामसहस्रकम्।
सर्वेरोगाःप्रणश्यन्तिदीर्घमायुश्चविन्दति॥२२॥
अयमायुष्करोनामप्रयोगःकल्पचोदितः।
ज्वरार्तंशिरसिस्पृष्ट्वापठेन्नामसहस्रकम्॥२३॥



तत्क्षणात्प्रशमंयातिशिरस्तोदोज्वरोऽपिच।
सर्वव्याधिनिवृत्त्यर्थंस्पृष्ट्वाभस्मजपेदिदम्॥२४॥
तद्भस्मधारणादेवनश्यन्तिव्याधयःक्षणात्।
जलंसम्मन्त्र्यकुम्भस्थंनामसाहस्रतोमुने॥२५॥
अभिषिञ्चेद्ग्रहग्रस्तान्ग्रहानश्यन्तिततक्षणात्।
सुधासागरमध्यस्थांध्यात्वाश्रीललिताम्बिकाम्॥२६॥
यःपठेन्नामसाहस्रंविषंतस्यविनश्यति।
वन्ध्यानांपुत्रलाभायनामसाहस्रमन्त्रितम्॥२७॥
नवनीतंप्रदद्यात्तुपुत्रलाभोभवेदध्रुवम्।
देव्याःपाशेनसम्बद्धामाकृष्टामङ्गुशेनच॥२८॥
ध्यात्वाऽभीष्टांस्त्रियंरात्रौजपेन्नामसहस्रकम्।
आयातिस्वसमीपंसायद्यप्यन्तःपुरंगता॥२९॥
राजाकर्षणकामश्चेद्राजावसथदिङ्मुखः।
त्रिरात्रंयःपठेदेतत्वीध्यानत्परः॥३०॥
सराजापारवश्येनतुरङ्गंवामतङ्गजम्।
आरुह्यायातिनिकटंदासवत्प्रणिपत्यच॥३१॥
तस्मैराज्यंचकोशंचददात्येववशंगतः।
रहस्यनामसाहस्रंयःकीर्तयतिनित्यशः॥३२॥
तन्मुखालोकमात्रेणमुह्येल्लोकत्रयंमुने।
यस्त्विदंनामसाहस्रंसकृत्पठतिभक्तिमान्॥३३॥
तस्ययेशत्रवस्तेषांनिहन्ताशरभेश्वरः।
योवाऽभिचारंकुरुतेनामसाहस्रपाठके ॥३४॥
निवर्त्यतत्क्रियांहन्यात्तंवैप्रत्यङ्गिरास्वयम्॥
येक्रूरदृष्ट्यावीक्षन्तेनामसाहस्रपाठकम्॥३५॥

तानन्धान्कुरुतेक्षिप्रंस्वयंमार्तण्डभैरवः।
धनंयोहरतेचोरैर्नामसाहस्रजापिनः॥३६॥
यत्रकुत्रस्थितंवापिक्षेत्रपालोनिहन्तितम्।
विद्यासुकुरुतेवादंयोविद्वान्नामजापिना॥३७॥
तस्यवाक्यतम्भनंसद्यःकरोतिनकुलेश्वरी।
योराजाकुरुतेवैरंनामसाहस्रजापिना॥३८॥
चतुरङ्गबलंतस्यदण्डिनीसंहरेत्स्वयम्।
यःपठेन्नामसाहस्रंषण्मासंभक्तिसंयुतः॥३९॥
लक्ष्मीश्चात्त्चल्यरहितासदातिष्ठतितद्गृहे।
मासमेकंप्रतिदिनंत्रिवारंयःपठेन्नरः॥४०॥
भारतीतस्यजिह्वाग्रेरङ्गेनृत्यतिनित्यशः।
यस्त्वेकवारंपठतिपक्षमेकत्मतन्द्रितः॥४१॥
मुह्यन्तिकामवशगामृगाक्ष्यस्तस्यवीक्षणात्।
यःपठेन्नामसाहस्रंजन्ममध्येसकृन्नरः॥४२॥
तद्दृष्टिगोचरास्सर्वेमुच्यन्तेसर्वकिल्बिषैः।
योवेत्तिनामसाहस्रंतस्मैदेयंद्विजन्मने॥४३॥
अन्नंवस्त्रंधनंधान्यंनान्येभ्यस्तुकदाचन।
श्रीमन्त्रराजंयोवेत्तिश्रीचक्रंयःसमर्चति॥४४॥
यःकीर्तयतिनामानितंसत्पात्रंविदुर्बुधाः।
तस्मैदेयंप्रयत्नेनश्रीदेवीप्रीतिमिच्छता॥४५॥
नकीर्तयतिनामानिमन्त्रराजंनवेत्तियः।
पशुतुल्यःसविज्ञेयस्तस्मैदत्तंनिरर्थकम्॥४६॥
परीक्ष्यविद्याविदुषस्तेभ्योदद्याद्विचक्षणः।
श्रीमन्त्रराजसदृशोयथामन्त्रोनविद्यते॥४७॥



देवताललितातुल्यायथानास्तिघटोद्भव।
रहस्यनामसाहस्रतुल्यानास्तितथास्तुतिः॥४८॥
लिखित्वापुस्तकेयस्तुनामसाहस्रमुत्तमम्।
समर्चयेत्सदाभक्त्यातस्यतुष्यतिसुन्दरी॥४९॥
बहुनात्रकिमुक्तेनाशृणुत्वंकुम्भसम्भव।
नानेनसदृशंस्तोत्रंसर्वतन्त्रेषुदृश्यते॥५०॥
तस्मादुपासकोनित्यंकीर्तयेदिदमादरात्।
एभिर्नामसहस्रैस्तुश्रीचक्रंयोऽर्चयेत्सकृत्॥५१॥
पद्मैर्वातुलसीपुष्पैःकल्हारैर्वाकदम्बकैः।
चम्पकैर्जातिकुसुमैःमल्लिकाकरवीरकैः॥५२॥
उत्पलैर्बिल्वपत्रैर्वाकुन्दकेसरपाटलैः।
अन्यैःसुगन्धिकुसुमैःकेतकीमाधवीमुखैः॥५३॥
तस्यपुण्यफलंवक्तुंनशक्नोतिमहेश्वरः।
सावेत्तिललितादेवीस्वचक्रार्चनजंफलम्॥५४॥
अन्येकथंविजानीयुर्ब्रह्माद्याःस्वल्पमेधसः।
प्रतिमासंपौर्णमास्यामेभिर्नामसहस्रकैः॥५५॥
रात्रौयश्चक्रराजस्थामर्चयेत्परदेवताम्।
सएवललितारूपस्तद्रूपाललितास्वयम्॥५६॥
नतयोर्विद्यतेभेदोभेदकृत्पापकृद्भवेत्।
महानवम्यांयोभक्तःश्रीदेवींचक्रमध्यगाम्॥५७॥
अर्चयेन्नामसाहस्रैस्तस्यमुक्तिःकरेस्थिता।
यस्तुनामसहस्रेणशुक्रवारेसमर्चयेत्॥५८॥
चक्रराजेमहादेवींतस्यपुण्यफलंशृणु।
सर्वान्कामानवाप्येहसर्वसौभाग्यसंयुतः॥५९॥

पुत्रपौत्रादिसंयुक्तोभुक्त्याभोगान्यथेप्सितान्।
अन्तेश्रीललितादेव्याःसायुज्यमतिदुर्लभम्॥६०॥
प्रार्थनीयंशिवाद्यैश्चप्राप्नोत्येवनसंशयः।
यःसहस्रंब्राह्मणानामेभिर्नामसहस्रकैः॥६१॥
समर्च्यभोजयेद्भक्त्यापायसापूपषड्रसैः।
तस्मैप्रीणातिललितास्वसाम्राज्यंप्रयच्छति॥६२॥
नतस्यदुर्लभंवस्तुत्रिषुलोकेषुविद्यते।
निष्कामःकीर्तयेद्यस्तुनामसाहस्रमुत्तमम्॥६३॥
ब्रह्मज्ञानमवाप्नोतियेनमुच्येतबन्धनात्।
धनार्थीधनमाप्नोतियशोऽर्थीचापुयाद्यशः॥६४॥
विद्यार्थीचापुयाद्विद्यांनामसाहस्रकर्तिनात्।
नानेनसदृशंस्तोत्रंभोगमोक्षप्रदंमुने॥६५॥
कीर्तनीयमिदंतस्माद्-भोग मोक्षर्थिभिनरैः।
त्रिराश्रमनिष्ठैश्चकीर्तनीयमिदंसदा॥६६॥
स्वधर्मसमनुष्ठानवैकल्यपरिपूर्तये।
कलौपापैकबहुलेधर्मानुष्ठानवर्जिते॥६७॥
नामसङ्कीर्तनंमुक्त्वानृणांनान्यत्परायणम्।
लौकिकाद्वचनान्मुख्यंविष्णुनामानुकीर्तनम्॥६८॥
विष्णुनामसहस्राच्चशिवनामैकमुत्तमम्।
शिवनामसहस्राच्चदेव्यानामैकमुत्तमम्॥६९॥
देवीनामसहस्राणिकोटिशःसन्तिकुम्भज।
तेषुमुख्यंदशविधंनामसाहस्रमुच्यते॥७०॥
रहस्यनामसाहस्रमिदंशस्तंदशस्वपि।
तस्मात्सङ्कीर्तयेन्नित्यंकलिदोषनिवृत्तये॥७१॥



मुख्यंश्रीमातृनामेतिनजानन्तिविमोहिताः।
विष्णुनामपराःकेच्छिवनामपराःपरे॥७२॥
नकश्चिदपिलोकेषुललितानामतत्परः।
येनान्यदेवतानामकीर्तितंजन्मकोटिषु॥७३॥
तस्यैवभवतिश्रद्धाश्रीदेवीनामकीर्तने।
चरमेजन्मनियथाश्रीविद्योपासकोभवेत्॥७४॥
नामसाहस्रपाठश्चतथाचरमजन्मनि।
यथैवविरलालोकेश्रीविद्याराजवेदिनः॥७५॥
तथैवविरलागुह्यनामसाहस्रपाठकाः।
मन्त्रराजजपश्चैवचक्रराजार्चनंतथा॥७६॥
रहस्यनामपाठश्चनाल्पस्यतपसःफलम्।
अपठन्नामसाहस्रंप्रीणयेद्योमहेश्वरीम्॥७७॥
सचक्षुषाविनारूपंपश्येदेवविमूढधीः।
रहस्यनामसाहस्रंत्यक्त्वायःसिद्धिकामुकः॥७८॥
सभोजनंविनानूनंक्षुन्निवृत्तिमभीप्सति!
सभक्तोललितादेव्याःसनित्यंकीर्तयेदिदम्॥७९॥
नान्यथाप्रीयतेदेवीकल्पकोटिशतैरपि।
तस्माद्रहस्यनामानिश्रीमातुःप्रयतःपठेत्॥८०॥
इतितेकथितंस्तोत्रंरहस्यंकुम्भसम्भव।
नाविद्यावेदिनेब्रूयान्नाभक्तायकदाचन॥८१॥
यथैवगोप्याश्रीविद्यातथागोप्यमिदंमुने।
पशुतुल्येषुनब्रूयाज्जनेषुस्तोत्रमुत्तमम्॥८२॥
योददातिविमूढात्माश्रीविद्यारहितायतु।
तस्मैकुप्यन्तियोगिन्यःसोऽनर्थःसुमहान्स्मृतः॥८३॥

रहस्यनामसाहस्रंतस्मात्सङ्गोपयेदिदम्।
स्वतन्त्रेणमयानोक्तंतवापिकलशोद्भव॥८४॥
ललिताप्रेरणेनैवमयोक्तंस्तोत्रमुत्तमम्।
कीतीनीयमिदं भक्त्या कुम्भ्योन निरन्तरम्
तेनतुष्टामहादेवीतवाभीष्टंप्रदास्यति॥८५॥

**श्रीसूतउवाच**

इत्युक्त्वाश्रीहयग्रीवोध्यात्वाश्रीललिताम्बिकाम्।
आनन्दमग्नदयःसद्यःपुलकितोऽभवत्॥८६॥

**॥इतिश्रीब्रह्माण्डपुराणेउत्तरखण्डेश्रीहयग्रीवागस्त्यसंवादेश्रीललितासहस्रनामस्तोत्रफलश्रुतिः उत्तरभागः समाप्तः॥**



## ॥श्रीललिता सहस्रनामावलिः॥

ओंश्रीमहाराज्ञ्यै नमः
ओंश्रीमत्सिंहासनेश्वर्यैनमः
ओंचिदग्निकुण्डसंभूतायैनमः
ओंदेवकार्यसमुद्यतायैनमः
ओंउद्यद्भानुसहस्राभायैनमः
ओंचतुर्बाहुसमन्वितायैनमः
ओंरागस्वरूपपाशाढ्यायैनमः
ओंक्रोधाकाराङ्कुशोज्ज्वलायै
नमः
ओंमनोरूपेक्षुकोदण्डायै(१०)
नमः
ओंपंचतन्मात्रसायकायै नमः
ओंनिजारुणप्रभापूरमज्जद्-
-ब्रह्माण्डमण्डलायैनमः
ओंचम्पकाशोकपुन्नागसौगन्धिक
-लसत्कचायैनमः
ओंकुरुविन्दमणिश्रेणी-
-कनत्कोटीरमण्डितायैनमः
ओंअष्टमीचन्द्रविभ्राज-
-दलिकस्थलशोभितायैनमः
ओंमुखचन्द्रकलंकाभ-
-मृगनाभिविशेषकायैनमः
ओंवदनस्मरमांगल्य-
- गृहतोरणचिल्लिकायैनमः
ओंवक्त्रलक्ष्मीपरीवाह-
-चलन्मीनाभलोचनायैनमः
ओंनवचम्पकपुष्पाभ–
-नासादण्डविराजितायैनमः
ओंताराकान्तितिरस्कारि-
-नासाभरणभासुरायै(२०)नमः
ओंकदम्बमञ्जरीक्लृप्त-
-कर्णपूरमनोहरायैनमः
ओंताटंकयुगलीभूत-
-तपनोडुपमण्डलायैनमः
ओंपद्मरागशिलादर्श-
-परिभाविकपोलभुवेनमः
ओंनवविद्रुमबिम्ब-
-श्रीन्यक्कारिरदनच्छदायैनमः
ओंशुद्धविद्याङ्कुराकार-
- द्विजपङ्क्तिद्वयोज्ज्वलायैनमः
ओंकर्पूरवीटिकामोदसमाकर्षि-
-दिगन्तरायैनमः
ओंनिजसल्लापमाधुर्य-
-विनिर्भत्सितकच्छप्यैनमः
ओंमन्दस्मितप्रभापूर-
- मज्जत्कामेशमानसायैनमः

ओंअनाकलित-
-सादृश्यचिबुकश्रीविराजितायैनमः
ओंकामेशबद्धमाङ्गल्यसूत्र-
-शोभितकन्धरायै(३०)नमः
ओंकनकाङ्गदकेयूर-
-कमनीयमुजान्वितायैनमः
ओंरत्नग्रैवेयचिन्ताकलोल-
-मुक्ताफलान्वितायैनमः
ओंकामेश्वारप्रेमरत्न-
-मणिप्रतिपणस्तन्यैनमः
ओंनाभ्यालवालरोमालि-
-लताफलकुचद्वय्यैनमः
ओंलक्ष्यरोमलताधार-
- तासमुन्नेयमध्यमायैनमः
ओंस्तनभारदलन्मध्य-
-पट्टबन्धवलित्रयायैनमः
ओंअरुणारुणकौसुम्भ-
-वस्त्रभास्वत्कटीतट्यैनमः
ओंरत्नकिङ्किणि-
-कारम्यरशनादामभूषितायैनमः
ओंकामेशज्ञातसौभाग्य-
-मार्दवोरुद्वयान्वितायैनमः
ओंमाणिक्यमुकुटाकार-
-जानुद्वयविराजितायै(४०)नमः

ओंइन्द्रगोपपरिक्षिप्त-
-स्मरतूणाभजङ्घिकायैनमः
ओंगूढगूल्फायैनमः
ओंकूर्मपृष्ठजयिष्णु–
-प्रपदान्वितायैनमः
ओंनखदीधितिसञ्छन्न-
-नमज्जनतमोगुणायैनमः
ओंपदद्वयप्रभाजाल-
-पराकृतसरोरुहायैनमः
ओंशिञ्जानमणिमञ्जीर-
- मण्डितश्रीपदाम्बुजायैनमः
ओंमरालीमन्दगमनायैनमः
ओंमहालावण्यशेवधयेनमः
ओंसर्वारुणायैनमः
ओंअनवद्याङ्ग्यै(५०)नमः
ओंसर्वाभरणभूषितायैनमः
ओंशिवकामेश्वराङ्कस्थायैनमः
ओंशिवायैनमः
ओंस्वाधीनवल्लभायैनमः
ओंसुमेरुमध्यशृङ्गस्थायैनमः
ओंश्रीमन्नगरनायिकायैनमः
ओंचिन्तामणिगृहान्तस्थायैनमः
ओंपञ्चब्रह्मासनस्थितायैनमः
ओंमहापद्माटवीसंस्थायैनमः



ओंकदम्बवनवासिन्यै(६०)नमः
ओंसुधासागरमध्यस्थायैनमः
ओंकामाक्ष्यैनमः
ओंकामदायिन्यैनमः
ओंदेवर्षिगणसंघातस्तूय
मानात्मवैभायैनमः
ओंभण्डासुरवधोद्युक्त
शक्तिसेनासमन्वितायैनमः
ओंसम्पत्करीसमारूढ
सिंधुरंव्रजसेवितायैनमः
ओंअश्वारूढाधिष्ठिताश्व
कोटिकोटिभिरावृतायैनमः
ओंचक्रराजरथारूढ
सर्वायुधपरिष्कृतायैनम
ओंगेयचक्ररथारूढ
मन्त्रिणीपरिसेवितायैनमः
ओंकिरिचक्ररथारूढ-
-दण्डनाथापुरस्कृतायै(७०)नमः
ओंज्वालामालिनिकाक्षिप्त
वह्निप्राकारमध्यगायैनमः
ओंभण्डसैन्यवधोद्युक्त
शक्तिविक्रमहर्षितायैनमः
ओंनित्यापराक्रमाटोप
निरीक्षणसमुत्सुकायैनमः

ओंभण्डपुत्रवधोद्युक्त
बालाविक्रमनन्दितायैनमः
ओंमन्त्रिण्यम्बाविरचित
विशुक्रवधतोषितायैनमः
ओंविषङ्गप्राणहरण
वाराहीवीर्यनन्दितायैनमः
ओंकामेश्वरमुखालोक
कल्पितश्रीगणेश्वरायैनमः
ओंमहागणेशनिर्भिन्न
विघ्नयन्त्रप्रहर्षितायैनमः
ओंभण्डासुरेन्द्रनिर्मुक्त
शस्त्रप्रत्यस्त्रवर्षिण्यैनमः
ओंकराङ्गुलिनखोत्पन्न-
नारायणदशाकृत्यै(८०)नमः
ओंमहापाशुपतास्त्राग्नि-
निर्दग्धासुरसैनिकायैनमः
ओंकामेश्वरास्त्रनिर्दग्ध-
सभाण्डासुरशून्यकायैनमः
ओंब्रह्मोपेन्द्रमहेन्द्रादि-
देवसंस्तुतवैभवायैनमः
ओंहरनेत्राग्निसंदग्धकाम-
-संजीवनौषध्यैनमः
ओंश्रीमद्वाग्भवकूटैक-
स्वरूपमुखपङ्कजायैनमः

ओंकण्ठाधःकटिपर्यन्तमध्यकूट-
-स्वरूपिण्यैनमः
ओंशक्तिकूटैकतापन्न-
कट्यधोभागधारिण्यैनमः
ओंमूलमन्त्रात्मिकायैनमः
ओंमूलकूटत्रयकलेबरायैनमः
ओंकुलामृतैकरसिकायै(९०)नमः
ओंकुलसंकेतपालिन्यैनमः
ओंकुलाङ्गनायैनमः
ओंकुलान्तःस्थायैनमः
ओंकौलिन्यैनमः
ओंकुलयोगिन्यैनमः
ओंअकुलायैनमः
ओंसमयान्तस्थायैनमः
ओंसमयाचारतत्परायैनमः
ओंमूलाधारैकनिलयायैनमः
ओंब्रह्मग्रन्थिविभेदिन्यै(१००)नमः
ओंमणिपूरान्तरुदितायैनमः
ओंविष्णुग्रन्थिविभेदिन्यैनमः
ओंआज्ञाचक्रान्तरालस्थायैनमः
ओंरुद्रग्रन्थिविभेदिन्यैनमः
ओंसहस्राराम्बुजारूढायैनमः
ओंसुधासाराभिवर्षिण्यैनमः
ओंतटिल्लतासमरुच्यैनमः

ओंषट्चक्रोपरिसंस्थितायैनमः
ओंमहासक्त्यैनमः
ओंकुण्डलिन्यै(११०)नमः
ओंबिसतन्तुतनीयस्यैनमः
ओंभवान्यैनमः
ओंभावनागम्यायैनमः
ओंभवानन्दफलप्रदायैनमः
ओंभद्रप्रियायैनमः
ओंभद्रमूर्त्यैनमः
ओंभक्तसौभाग्यदायिन्यैनमः
ओंभक्तिप्रियायैनमः
ओंभक्तिगम्यायैनमः
ओंभक्तिवश्यायै(१२०)नमः
ओंभयापहायैनमः
ओंशाम्भव्यैनमः
ओंशारदाराध्यायैनमः
ओंशर्वाण्यैनमः
ओंशर्मदायिन्यैनमः
ओंशांकर्यैनमः
ओंश्रीकर्यैनमः
ओंसाध्व्यैनमः
ओंशरच्चन्द्रनिभाननायैनमः
ओंशातोदर्यै(१३०)नमः
ओंशान्तिमत्यैनमः



ओंनिराधारायैनमः
ओंनिरञ्जनायैनमः
ओंनिर्लेपायैनमः
ओंनिर्मलायैनमः
ओंनित्यायैनमः
ओंनिष्प्राकृतायैनमः
ओंनिराकुलायैनमः
ओंनिर्गुणायैनमः
ओंनिष्कलायै(१४०)नमः
ओंशान्तायैनमः
ओंनिष्कामायैनमः
ओंनिरुपप्लवायैनमः
ओंनित्यमुक्तायैनमः
ओंनिर्विकारायैनमः
ओंशुभाकारायैनमः
ओंनिराश्रयायैनमः
ओंनित्यशुद्धायैनमः
ओंनित्यबुद्धायैनमः
ओंनिरवद्यायै(१५०)नमः
ओंनिरन्तरायैनमः
ओंनिष्कारणायैनमः
ओंनिष्कलंकायैनमः
ओंनिरुपाधयेनमः
ओंनिरीश्वरायैनमः

ओंनीरोगायैनमः
ओंरोगमथन्यैनमः
ओंसुदेहायैनमः
ओंशुभदायिन्यैनमः
ओंनिश्चिन्तायै(१६०)नमः
ओंनिरहङ्कारायैनमः
ओंनिर्मोहायैनमः
ओंमोहनाशिन्यैनमः
ओंनिर्ममायैनमः
ओंममताहन्त्र्यैनमः
ओंनिष्पापायैनमः
ओंपापनाशिन्यैनमः
ओंनिष्क्रोधायैनमः
ओंक्रोधशमन्यैनमः
ओंनिर्लोभायै(१७०)नमः
ओंलोभनाशिन्यैनमः
ओंनिःसंशयायैनमः
ओंसंशयघ्न्यैनमः
ओंनिर्भयायैनमः
ओंभयनाशिन्यैनमः
ओंनिर्विकल्पायैनमः
ओंनिराबाधायैनमः
ओंनिर्भेदायैनमः
ओंभेदनाशिन्यैनमः

ओंनिर्नाशायै(१८०)नमः
ओंमृत्युमथन्यैनमः
ओंसक्रियायै नमः
ओंसपरिग्रहायैनमः
ओंनिस्तुलायैनमः
ओंनीलचिकुरायैनमः
ओं निरपयायैनमः
ओं निरत्ययायैनमः
ओंदुर्लभायैनमः
ओंदुर्गमायैनमः
ओंदुर्गायै(१९०)नमः
ओंदुःखहन्त्र्यैनमः
ओंसुखप्रदायैनमः
ओंदुष्टदूरायैनमः
ओंदुराचारशमन्यैनमः
ओंदोषवर्जितायैनमः
ओंसर्वज्ञायैनमः
ओंसान्द्रकरुणायैनमः
ओंसमानाधिकवर्जितायैनमः
ओंसर्वशक्तिमय्यैनमः
ओंसर्वमंगलायै(२००)नमः
ओंसद्गतिप्रदायैनमः
ओंसर्वेश्वयैनमः
ओंसर्वमय्यैनमः

ओंसर्वमन्त्रस्वरूपिण्यैनमः
ओंसर्वयन्त्रात्मिकायैनमः
ओंसर्वतन्त्ररूपायैनमः
ओंमनोन्मन्यैनमः
ओंमाहेश्वर्यैनमः
ओंमहादेव्यैनमः
ओंमहालक्ष्म्यै(२१०)नमः
ओंमृडप्रियायैनमः
ओंमहारूपायैनमः
ओंमहापूज्यायैनमः
ओंमहापातकनाशिन्यैनमः
ओंमहामायायैनमः
ओंमहासत्वायैनमः
ओंमहाशक्त्यैनमः
ओंमहारत्यैनमः
ओंमहाभोगायैनमः
ओंमहैश्वर्यायै(२२०)नमः
ओंमहावीर्यायैनमः
ओंमहाबलायैनमः
ओंमहाबुद्ध्यैनमः
ओंमहासिद्ध्यैनमः
ओंमहायोगेश्वरेश्वर्यैनमः
ओंमहातन्त्रायैनमः
ओंमहामन्त्रायैनमः



ओंमहायन्त्रायैनमः
ओंमहासनायैनमः
ओंमहायागक्रमाराध्यायै(२३०)नमः
ओंमहाभैरवपूजितायैनमः
ओंमहेश्वरमहाकल्पमहा-
-ताण्डवसाक्षिण्यैनमः
ओंमहाकामेशमहिष्यैनमः
ओंमहात्रिपुरसुन्दर्यैनमः
ओंचतुःषष्ट्युपचाराढ्यायैनमः
ओंचतुःषष्टिकलामय्यैनमः
ओंमहाचतुःषष्टिकोटि-
- योगिनीगणसेवितायैनमः
ओंमनुविद्यायैनमः
ओंचन्द्रविद्यायैनमः
ओंचन्द्रमण्डलमध्यगायै(२४०)नमः
ओंचारुरूपायैनमः
ओंचारुहासायैनमः
ओंचारुचन्द्रकलाधरायैनमः
ओंचराचरजगन्नाथायैनमः
ओंचक्रराजनिकेतनायैनमः
ओंपार्वत्यैनमः
ओंपद्मनयनायैनमः
ओंपद्मरागसमप्रभायैनमः
ओंपञ्चप्रेतासनासीनायैनमः

ओंपञ्चब्रह्मस्परूपिण्यै(२५०)नमः
ओंचिन्मय्यैनमः
ओंपरमानन्दायैनमः
ओंविज्ञानघनरूपिण्यैनमः
ओंध्यानध्यातृध्येयरूपायैनमः
ओंधर्माधर्मविवर्जितायैनमः
ओंविश्वरूपायैनमः
ओंजागरिण्यैनमः
ओंस्वपन्त्यैनमः
ओंतैजसात्मिकायैनमः
ओंसुप्तायै(२६०)नमः
ओंप्राज्ञात्मिकायैनमः
ओंतुर्यायैनमः
ओंसर्वावस्थाविवर्जितायैनमः
ओंसृष्टिकर्त्र्यैनमः
ओंब्रह्मरूपायैनमः
ओंगोप्त्र्यैनमः
ओंगोविन्दरूपिण्यैनमः
ओंसंहारिण्यैनमः
ओंरुद्ररूपायैनमः
ओंतिरोधानकर्यै(२७०)नमः
ओंईश्वर्यैनमः
ओंसदाशिवायैनमः
ओंअनुग्रहदायैनमः

ओंपंचकृत्यपरायणायैनमः
ओंभानुमण्डलमध्यस्थायैनमः
ओंभैरव्यैनमः
ओंभगमालिन्यैनमः
ओंपद्मासनायैनमः
ओंभगवत्यैनमः
ओंपद्मनाभसहोदर्यै(२८०)नमः
ओंउन्मेषनिमिषोत्पन्न-
विपन्नभुवनावल्यैनमः
ओंसहस्रशीर्षवदनायैनमः
ओंसहस्राक्ष्यैनमः
ओंसहस्रपदेनमः
ओंआब्रह्मकीटजनन्यैनमः
ओंवर्णाश्रमविधायिन्यैनमः
ओंनिजाज्ञारूपनिगमायैनमः
ओंपुण्यापुण्यफलप्रदायैनमः
ओंश्रुतिसीमन्तसिन्दूरीकृत-
- पादाब्जधूलिकायैनमः
ओंसकलागमसंदोहशुक्ति-
-सम्पुटमौक्तिकायै(२९०)नमः
ओंपुरुषार्थप्रदायैनमः
ओंपूर्णायैनमः
ओंभोगिन्यैनमः
ओंभुवनेश्वर्यैनमः

ओंअम्बिकायैनमः
ओंअनादिनिधनायैनमः
ओंहरिब्रह्मेन्द्रसेवितायैनमः
ओंनारायण्यैनमः
ओंनादरूपायैनमः
ओंनादोपासनतत्परायै(३००)नमः
ओंह्रींकार्यैनमः
ओंह्रीमत्यैनमः
ओंहृद्यायैनमः
ओंहेयोपादेयवर्जितायैनमः
ओंराजराजार्चितायैनमः
ओंराज्ञ्यैनमः
ओंरम्यायैनमः
ओंराजीवलोचनायैनमः
ओंरञ्जन्यैनमः
ओंरमण्यै(३१०)नमः
ओंरस्यायैनमः
ओंरणत्किङ्किणिमेखलायैनमः
ओंरमायैनमः
ओंराकेन्दुवदनायैनमः
ओंरतिरूपायैनमः
ओंरतिप्रियायैनमः
ओंरक्षाकर्यैनमः
ओंराक्षसघ्न्यैनमः



ओंरामायैनमः
ओंरमणलम्पटायै(३२०)नमः
ओंकाम्यायैनमः
ओंकामकलारूपायैनमः
ओंकदम्बकुसुमप्रियायैनमः
ओंकल्याण्यैनमः
ओंजगतीकन्दायैनमः
ओंकरुणारससागरायैनमः
ओंकलावत्यैनमः
ओंकलालापायैनमः
ओंकान्तायैनमः
ओंकादम्बरीप्रियायै(३३०)नमः
ओंवरदायैनमः
ओंवामनयनायैनमः
ओंवारुणीमदविह्वलायैनमः
ओंविश्वाधिकायैनमः
ओंवेदवेद्यायैनमः
ओंविन्ध्याचलनिवासिन्यैनमः
ओंविधात्र्यैनमः
ओंवेदजनन्यैनमः
ओंविष्णुमायायैनमः
ओंविलासिन्यै(३४०)नमः
ओंक्षेत्रस्वरूपायैनमः
ओंक्षेत्रेश्यैनमः

ओंक्षेत्रक्षेत्रज्ञपालिन्यैनमः
ओंक्षयवृद्धिविनिर्मुक्तायैनमः
ओंक्षेत्रपालसमर्चितायैनमः
ओंविजयायैनमः
ओंविमलायैनमः
ओंवन्द्यायैनमः
ओंवन्दारुजनवत्सलायैनमः
ओंवाग्वादिन्यै(३५०)नमः
ओंवामकेश्यैनमः
ओंवह्निमण्डलवासिन्यैनमः
ओंभक्तिमत्कल्पलतिकायैनमः
ओंपशुपाशविमोचिन्यैनमः
ओंसंहृताशेषपाषण्डायैनमः
ओंसदाचारप्रवर्तिकायैनमः
ओंतापत्रयाग्निसन्तप्त-
समाह्लादनचन्द्रिकायैनमः
ओंतरुण्यैनमः
ओंतापसाराध्यायैनमः
ओंतनुमध्यायै(३६०)नमः
ओंतमोपहायैनमः
ओंचित्यैनमः
ओंतत्पदलक्ष्यार्थायैनमः
ओंचिदेकरसरूपिण्यैनमः

ओंस्वात्मानन्दलवीभूत-
ब्रह्माद्यानन्दसन्तत्यैनमः
ओंपरा-प्रत्यक्चितीरूपायैनमः
ओंपश्यन्त्यैनमः
ओंपरदेवतायैनमः
ओंमध्यमायैनमः
ओंवैखरीरूपायै(३७०)नमः
ओंभक्तमानसहंसिकायैनमः
ओंकामेश्वरप्राणनाड्यैनमः
ओंकृतज्ञायैनमः
ओंकामपूजितायैनमः
ओंश्रृंगाररससम्पूर्णायैनमः
ओंजयायैनमः
ओंजालन्धरस्थितायैनमः
ओंओड्याणपीठनिलयायैनमः
ओंबिन्दुमण्डलवासिन्यैनमः
ओंरहोयागक्रमाराध्यायै(३८०)नमः
ओंरहस्तर्पणतर्पितायैनमः
ओंसद्यःप्रसादिन्यैनमः
ओंविश्वसाक्षिण्यैनमः
ओंसाक्षिवर्जितायैनमः
ओंषडंगदेवतायुक्तायैनमः
ओंषाड्गुण्यपरिपूरितायैनमः
ओंनित्यक्लिन्नायैनमः

ओंनिरुपमायैनमः
ओंनित्यानन्दप्रदायिन्यैनमः
ओंनित्याषोडशिकारूपायै(३९०)
नमः
ओंश्रीकण्ठार्धशरीरिण्यैनमः
ओंप्रभावत्यैनमः
ओंप्रभारूपायैनमः
ओंप्रसिद्धायैनमः
ओंपरमेश्वर्यैनमः
ओंमूलप्रकृत्यैनमः
ओंअव्यक्तायैनमः
ओंव्यक्ताव्यक्तस्वरूपिण्यैनमः
ओंव्यापिन्यैनमः
ओंविविधाकारायै(४००)नमः
ओंविद्याविद्यास्वरूपिण्यैनमः
ओंमहाकामेशनयन-
कुमुदाह्लादकौमुद्यैनमः
ओंभक्ताहार्दतमोभेद-
भानुमद्भानुसंतत्यैनमः
ओंशिवदूत्यैनमः
ओंशिवाराध्यायैनमः
ओंशिवमूर्त्यैनमः
ओंशिवंकर्यैनमः
ओंशिवप्रियायैनमः



ओंशिवपरायैनमः
ओंशिष्टेष्टायै(४१०)नमः
ओंशिष्टपूजितायैनमः
ओंअप्रमेयायैनमः
ओंस्वप्रकाशायैनमः
ओंमनोवाचामगोचरायैनमः
ओंचिच्छक्त्यैनमः
ओंचेतनारूपायैनमः
ओंजडशक्त्यैनमः
ओंजडात्मिकायैनमः
ओंगायत्र्यैनमः
ओंव्याहृत्यै(४२०)नमः
ओंसंध्यायैनमः
ओंद्विजवृन्दनिषेवितायैनमः
ओंतत्त्वासनायैनमः
ओंतस्मैनमः
ओंतुभ्यंनमः
ओंअय्यैनमः
ओंपञ्चकोशान्तरस्थितायैनमः
ओंनिःसीममहिम्नेनमः
ओंनित्ययौवनायैनमः
ओंमदशालिन्यै(४३०)नमः
ओंमदघूर्णितरक्ताक्ष्यैनमः
ओंमदपाटलगण्डभुवेनमः

ओंचन्दनद्रवदिग्धाङ्ग्यैनमः
ओंचाम्पेयकुसुमप्रियायैनमः
ओंकुशलायैनमः
ओंकोमलाकारायैनमः
ओंकुरुकुल्लायैनमः
ओंकुलेश्वर्यैनमः
ओंकुलकुण्डालयायैनमः
ओंकौलमार्गतत्परसेवितायै
नमः(४४०)
ओंकुमारगणनाथाम्बायैनमः
ओंतुष्ट्यैनमः
ओंपुष्ट्यैनमः
ओंमत्यैनमः
ओंधृत्यैनमः
ओंशान्त्यैनमः
ओंस्वस्तिमत्यैनमः
ओंकान्त्यैनमः
ओंनन्दिन्यैनमः
ओंविघ्ननाशिन्यै(४५०)नमः
ओंतेजोवत्यैनमः
ओंत्रिनयनायैनमः
ओंलोलाक्षीकामरूपिण्यैनमः
ओंमालिन्यैनमः
ओंहंसिन्यैनमः

ओंमात्रेनमः
ओंमलयाचलवासिन्यैनमः
ओंसुमुख्यैनमः
ओंनलिन्यैनमः
ओंसुभ्रुवे(४६०)नमः
ओंशोभनायैनमः
ओंसुरनायिकायैनमः
ओंकालकण्ठ्यैनमः
ओंकान्तिमत्यैनमः
ओंक्षोभिण्यैनमः
ओंसूक्ष्मरूपिण्यैनमः
ओंवज्रेश्वर्यैनमः
ओंवामदेव्यैनमः
ओंवयोऽवस्थाविवर्जितायैनमः
ओंसिद्धेश्वर्यै(४७०)नमः
ओंसिद्धविद्यायैनमः
ओंसिद्धमात्रेनमः
ओंयशस्विन्यैनमः
ओंविशुद्धिचक्रनिलयायैनमः
ओंआरक्तवर्णायैनमः
ओंत्रिलोचनायैनमः
ओंखट्वाङ्गादिप्रहरणायैनमः
ओंवदनैकसमन्वितायैनमः
ओंपायसान्नप्रियायैनमः

ओंत्वक्स्थायै(४८०) नमः
ओंपशुलोकभयंकर्यैनमः
ओंअमृतादि–
सर्वशक्तिसंवृतायैनमः
ओंडाकिनीश्वर्यैनमः
ओंअनाहताब्जनिलयायैनमः
ओंश्यामाभायैनमः
ओंवदनद्वयायैनमः
ओंदंष्ट्रोज्वलायैनमः
ओंअक्षमालादिधरायैनमः
ओंरुधिरसंस्थितायैनमः
ओंकालरात्र्यादिशक्त्यौघ-
वृतायै(४९०)नमः
ओंस्निग्धौदनप्रियायैनमः
ओंमहावीरेन्द्रवरदायैनमः
ओंराकिण्यम्बास्वरूपिण्यैनमः
ओंमणिपूराब्जनिलयायैनमः
ओंवदनत्रयसंयुतायैनमः
ओंवज्राधिकायुधोपेतायैनमः
ओंडामर्यादिभिरावृतायैनमः
ओंरक्तवर्णायैनमः
ओंमांसनिष्ठायैनमः
ओंगुडान्नप्रीतमानसायै(५००)नमः
ओंसमस्तभक्तसुखदायैनमः



ओंलाकिन्यम्बास्वरूपिण्यैनमः
ओंस्वाधिष्टानाम्बुजगतायैनमः
ओंचतुर्वक्त्रमनोहरायैनमः
ओंशूलाद्यायुधसम्पन्नायैनमः
ओंपीतवर्णायैनमः
ओंअतिगर्वितायैनमः
ओंमेदोनिष्ठायैनमः
ओंमधुप्रीतायैनमः
ओंबन्दिन्यादि
समन्वितायै(५१०)नमः
ओंदध्यन्नासक्तहृदयायैनमः
ओंकाकिनीरूपधारिण्यैनमः
ओंमूलाधाराम्बुजारूढायैनमः
ओंपंचवक्त्रायैनमः
ओंअस्थिसंस्थितायैनमः
ओंअंकुशादिप्रहरणायैनमः
ओंवरदादिनिषेवितायैनमः
ओंमुद्गौदनासक्तचित्तायैनमः
ओंसाकिन्यम्बास्वरूपिण्यैनमः
ओंआज्ञाचक्राब्जनिलायै(५२०)नमः
ओंशुक्लवर्णायैनमः
ओंषडाननायैनमः
ओंमज्जासंस्थायैनमः

ओंहंसवतीमुख्यशक्ति-
- समन्वितायैनमः
ओंहरिद्रान्नैकरसिकायैनमः
ओंहाकिनीरूपधारिण्यैनमः
ओंसहस्रदलपद्मस्थायैनमः
ओंसर्ववर्णोपशोभितायैनमः
ओंसर्वायुधधरायैनमः
ओंशुक्लसंस्थितायै(५३०)नमः
ओंसर्वतोमुख्यैनमः
ओंसर्वौदनप्रीतचित्तायैनमः
ओंयाकिन्यम्बास्वरूपिण्यैनमः
ओंस्वाहायैनमः
ओंस्वधायैनमः
ओंअमत्यैनमः
ओंमेधायैनमः
ओंश्रुत्यैनमः
ओंस्मृत्यैनमः
ओंअनुत्तमायै(५४०)नमः
ओंपुण्यकीर्त्यैनमः
ओंपुण्यलभ्यायैनमः
ओंपुण्यश्रवणकीर्तनायैनमः
ओंपुलोमजार्चितायैनमः
ओंबन्धमोचन्यैनमः
ओंबर्बरालकायैनमः

ओंविमर्शरूपिण्यैनमः
ओंविद्यायैनमः
ओंवियदादिजगत्प्रसुवेनमः
ओंसर्वव्याधिप्रशमन्यैनमः(५५०)
ओंसर्वमृत्युनिवारिण्यैनमः
ओंअग्रगण्यायैनमः
ओंअचिन्त्यरूपायैनमः
ओंकलिकल्मषनाशिन्यैनमः
ओंकात्यायन्यैनमः
ओंकालहन्त्र्यैनमः
ओंकमलाक्षनिषेवितायैनमः
ओंताम्बूलपूरितमुख्यैनमः
ओंदाडिमीकुसुमप्रभायैनमः
ओंमृगाक्ष्यै(५६०)नमः
ओंमोहिन्यैनमः
ओंमुख्यायैनमः
ओंमृडान्यैनमः
ओंमित्ररूपिण्यैनमः
ओंनित्यतृप्तायैनमः
ओंभक्तनिधयेनमः
ओंनियन्त्र्यैनमः
ओंनिखिलेश्वर्यैनमः
ओंवामादिवासनालभ्यायैनमः(५७०
)ओंमहाप्रलयसाक्षिण्यैनमः

ओंपराशक्त्यैनमः
ओंपरानिष्ठायैनमः
ओंआनन्दघनरूपिण्यैनमः
ओंमाध्वीपानालसायैनमः
ओंमत्तायैनमः
ओंमातृकावर्णरूपिण्यैनमः
ओंमहाकैलासनिलयायैनमः
ओंमृणालमृदुदोर्लतायैनमः
ओंमहनीयायैनमः
ओंदयामूर्त्यै(५८०)नमः
ओंमहासाम्राज्यशालिन्यैनमः
ओंआत्मविद्यायैनमः
ओंमहाविद्यायैनमः
ओंत्रिकूटायैनमः
ओंकामकोटिकायैनमः
ओं श्रीकामसेविताविद्यायैनमः
ओंश्रीविद्यायैनमः
ओंषोडशाक्षर्यैनमः
ओंकटाक्षकिंकरीभूतकमला-
- कोटिसेवितायैनमः
ओंशिरःस्थितायै(५९०)नमः
ओंचन्द्रनिभायैनमः
ओंभालस्थायैनमः
ओंइन्द्रधनुःप्रभायैनमः



ओंहृदयस्थायैनमः
ओंरविप्रख्यायैनमः
ओंत्रिकोणान्तरदीपिकायैनमः
ओंदाक्षायण्यैनमः
ओंदैत्यहन्त्र्यैनमः
ओंदक्षयज्ञविनाशिन्यैनमः
ओंदरान्दोलित
दीर्घाक्ष्यै(६००)नमः
ओंदरहासोज्ज्वलन्मुख्यैनमः
ओंगुरूमूर्त्यैनमः
ओंगुणनिधयेनमः
ओंगोमात्रेनमः
ओंगुहजन्मभुवेनमः
ओंदेवेश्यैनमः
ओंदण्डनीतिस्थायैनमः
ओंदहराकाशरूपिण्यैनमः
ओंप्रतिपन्मुख्यराकान्त-
- तिथिमण्डलपूजितायैनमः
ओंकलात्मिकायै(६१०)नमः
ओंकलानाथायैनमः
ओंकाव्यालापविनोदिन्यैनमः
ओंसचामररमावाणीसव्य-
दक्षिणसेवितायैनमः
ओंआदिशक्तयैनमः

ओंअमेयायैनमः
ओंआत्मनेनमः
ओंपरमायैनमः
ओंपावनाकृतयेनमः
ओंअनेककोटिब्रह्माण्ड-
- जनन्यैनमः
ओंदिव्यविग्रहायै(६२०)नमः
ओंक्लींकार्यैनमः
ओंकेवलायैनमः
ओंगुह्यायैनमः
ओंकैवल्यपददायिन्यैनमः
ओंत्रिपुरायैनमः
ओंत्रिजगद्वन्द्यायैनमः
ओंत्रिमूर्त्यैनमः
ओंत्रिदशेश्वर्यैनमः
ओंत्र्यक्षर्यैनमः
ओंदिव्यगन्धाढ्यायै(६३०)नमः
ओंसिन्दूरतिलकाञ्चितायैनमः
ओंउमायैनमः
ओंशैलेन्द्रतनयायैनमः
ओंगौर्यैनमः
ओंगन्धर्वसेवितायैनमः
ओंविश्वगर्भायैनमः
ओंस्वर्णगर्भायैनमः

ओंअवरदायैनमः
ओंवागधीश्वर्यैनमः
ओंध्यानगम्यायैनमः
ओंअपरिच्छेद्यायैनमः
ओंज्ञानदायैनमः
ओंज्ञानविग्रहायैनमः
ओंसर्ववेदार्थसंवेद्यायैनमः
ओंसत्यानन्दस्वरूपिण्यैनमः
ओंलोपामुद्रार्चितायैनमः
ओंलीलाक्लृप्तब्रह्माण्ड-
-मण्डलायैनमः
ओंअदृश्यायैनमः
ओंदृश्यरहितायैनमः
ओंविज्ञात्र्यै(६५०)नमः
ओंवेद्यवर्जितायैनमः
ओंयोगिन्यैनमः
ओंयोगदायैनमः
ओंयोग्यायैनमः
ओंयोगानन्दायैनमः
ओंयुगन्धरायैनमः
ओंइच्छाशक्तिज्ञानशक्ति-
क्रियाशक्तिस्वरूपिण्यैनमः
ओंसर्वाधारायैनमः
ओंसुप्रतिष्ठायैनमः

ओंसदसद्रूपधारिण्यै(६६०)नमः
ओंअष्टमूर्त्यैनमः
ओंअजाजैत्र्यैनमः
ओंलोकयात्राविधायिन्यैनमः
ओंएकाकिन्यैनमः
ओंभूमरूपायैनमः
ओंपरायैनमः
ओंप्रकृतिरूपिण्यैनमः
ओंअन्नदायैनमः
ओंवसुदायैनमः
ओंवृद्धायै(६७०)नमः
ओंब्रह्मात्मैक्यस्वरूपिण्यैनमः
ओंबृहत्यैनमः
ओंब्राह्मण्यैनमः
ओंब्राह्म्यैनमः
ओंब्रह्मानन्दायैनमः
ओंबलिप्रियायैनमः
ओंभाषारूपायैनमः
ओंबृहत्सेनायैनमः
ओंभवरूपविलासिन्यैनमः
ओंसुखाराध्यायै(६८०)नमः
ओंशुभकर्यैनमः
ओंशोभनासुलभागत्यैनमः
ओंराजराजेश्वर्यैनमः



ओंराज्यदायिन्यैनमः
ओंराज्यवल्लभायैनमः
ओंराजत्कृपायैनमः
ओंराजपीठनिवेशित-
- निजाश्रितायैनमः
ओंराज्यलक्ष्म्यैनमः
ओंकोशनाथायैनमः
ओंचतुरंगबलेश्वर्यै(६९०)नमः
ओंसाम्राज्यदायिन्यैनमः
ओंसत्यसन्धायैनमः
ओंसागरमेखलायैनमः
ओंदीक्षितायैनमः
ओंदैत्यशमन्यैनमः
ओंसर्वलोकवंशकर्यैनमः
ओंसर्वार्थदात्र्यैनमः
ओंसावित्र्यैनमः
ओंसच्चिदानन्दरूपिण्यैनमः
ओंदेशकालापरिच्छिन्नायै
नमः (७००)
ओंसर्वगायैनमः
ओंसर्वमोहिन्यैनमः
ओंसरस्वत्यैनमः
ओंशास्त्रमय्यैनमः
ओंगुहाम्बायैनमः

ओंगुह्यरूपिण्यैनमः
ओंसर्वोपाधिविनिर्मुक्तायैनमः
ओंसदाशिवपतिव्रतायैनमः
ओंसम्प्रदायेश्वर्यैनमः
ओंसाधुने(७१०)नमः
ओंयैनमः
ओंगुरूमण्डलरूपिण्यैनमः
ओंकुलोत्तीर्णायैनमः
ओंभगाराध्यायैनमः
ओंमायायैनमः
ओंमधुमत्यैनमः
ओंमह्यैनमः
ओंगणाम्बायैनमः
ओंगुह्यकाराध्यायैनमः
ओंकोमलाङ्ग्यै(७२०)नमः
ओंगुरुप्रियायैनमः
ओंस्वतन्त्रायैनमः
ओंसर्वतन्त्रेश्यैनमः
ओंदक्षिणामूर्तिरूपिण्यैनमः
ओंसनकादिसमाराध्यायैनमः
ओंशिवज्ञानप्रदायिन्यैनमः
ओंचित्कलायैनमः
ओंआनन्दकलिकायैनमः
ओंप्रेमरूपायैनमः

ओंप्रियंकर्यै(७३०)नमः
ओंनामपारायणप्रीतायैनमः
ओंनन्दिविद्यायैनमः
ओंनटेश्वर्यैनमः
ओंसत्याजगदधिष्ठानायैनमः
ओंमुक्तिदायैनमः
ओंमुक्तिरूपिण्यैनमः
ओंलास्यप्रियायैनमः
ओंलयकर्यैनमः
ओंलज्जायैनमः
ओंरम्भादिवन्दितायै(७४०)नमः
ओंजन्मदावसुधावृष्ट्यैनमः
ओंपापारण्यदवानलायैनमः
ओंदौर्भाग्यतूलवातूलायैनमः
ओंजराध्वान्तरविप्रभायैनमः
ओंभाग्याब्धिचन्द्रिकायैनमः
ओंभक्तचित्तकेकि-
-घनाघनायैनमः
ओंमहाकालप्राणसख्यैनमः
ओंमहादेवशवस्थितायैनमः
ओंमहेश्वर्यैनमः
ओंमहाकाल्यै(७५०)नमः
ओंमहाग्रासायैनमः
ओंमहाशनायैनमः

ओंअपर्णायैनमः
ओंचण्डिकायैनमः
ओंचण्डमुण्डासुरनिषूदिन्यैनमः
ओंक्षराक्षरात्मिकायैनमः
ओंसर्वलोकेश्यैनमः
ओंविश्वधारिण्यैनमः
ओंत्रिवर्गदात्र्यैनमः
ओंसुभगायै(७६०)नमः
ओंत्र्यम्बकायैनमः
ओंत्रिगुणात्मिकायैनमः
ओंस्वर्गापवर्गदायैनमः
ओंशुद्धायैनमः
ओंजपापुष्पनिभाकृतयेनमः
ओंओजोवत्यैनमः
ओंद्युतिधरायैनमः
ओंयज्ञरूपायैनमः
ओंप्रियव्रतायैनमः
ओंदुराराध्यायै(७७०)नमः
ओंदुराधर्षायैनमः
ओंपाटलीकुसुमप्रियायैनमः
ओंमहत्यैनमः
ओंमेरुनिलयायैनमः
ओंमन्दारकुसुमप्रियायैनमः
ओंवीराराध्यायैनमः



ओंविराड्रूपायैनमः
ओंविरजसेनमः
ओंविश्वतोमुख्यैनमः
ओंप्रत्यग्रूपायै(७८०)नमः
ओंपराकाशायैनमः
ओंप्राणदायैनमः
ओंप्राणरूपिण्यैनमः
ओंमार्तण्डभैरवाराध्यायैनमः
ओंमन्त्रिणीन्यस्तराज्यधुरेनमः
ओंत्रिपुरेश्यैनमः
ओंजयत्सेनायैनमः
ओंनिस्त्रैगुण्यायैनमः
ओंपरापरायैनमः
ओंसत्यज्ञानानन्दरूपायैनमः (७९०)
ओंसामरस्यपरायणायैनमः
ओंकपर्दिन्यैनमः
ओंकलामालायैनमः
ओंकामदुघेनमः
ओंकामरूपिण्यैनमः
ओंकलानिधयेनमः
ओंकाव्यकलायैनमः
ओंरसज्ञायैनमः
ओंरसशेवधयेनमः
ओंपुष्टायै(८००)नमः

ओंपुरातनायैनमः
ओंपूज्यायैनमः
ओंपुष्करायैनमः
ओंपुष्करेक्षणायैनमः
ओंपरस्मैज्योतिषेनमः
ओंपरस्मैधाम्नेनमः
ओंपरमाणवेनमः
ओंपरात्परायैनमः
ओंपाशहस्तायैनमः
ओंपाशहन्त्र्यै(८१०)नमः
ओंपरमन्त्रविभेदिन्यैनमः
ओंमूर्तायैनमः
ओंअमूर्तायैनमः
ओंअनित्यतृप्तायैनमः
ओंमुनिमानसहंसिकायैनमः
ओंसत्यव्रतायैनमः
ओंसत्यरूपायैनमः
ओंसर्वान्तर्यामिण्यैनमः
ओंसत्यैनमः
ओंब्रह्माण्यै(८२०)नमः
ओंब्रह्मणेनमः
ओंजनन्यैनमः
ओंबहुरूपायैनमः
ओंबुधार्चितायैनमः

ओंप्रसवित्र्यैनमः
ओंप्रचण्डायैनमः
ओंआज्ञायैनमः
ओंप्रतिष्ठायैनमः
ओंप्रकटाकृतयेनमः
ओंप्राणेश्वर्यै(८३०)नमः
ओंप्राणदात्र्यैनमः
ओंपञ्चाशत्पीठरूपिण्यैनमः
ओंविश्रृङ्खलायैनमः
ओंविविक्तस्थायैनमः
ओंवीरमात्रेनमः
ओंवियत्प्रसुवेनमः
ओंमुकुन्दायैनमः
ओंमुक्तिनिलयायैनमः
ओंमूलविग्रहरूपिण्यैनमः
ओंभावज्ञायै(८४०)नमः
ओंभवजनन्यैनमः
ओंभवचक्रप्रवर्तिन्यैनमः
ओंछन्दःसारायैनमः
ओंशास्त्रसारायैनमः
ओंमंत्रसारायैनमः
ओंतलोदर्यैनमः
ओंउदारकीर्तयेनमः

ओंउद्दामवैभवायैनमः
ओंवर्णरूपिण्यैनमः
ओंजन्ममृत्युजरातप्तजन -
-विश्रान्तिदायिन्यै(८५०)नमः
ओंसर्ववेदप्रतीपाद्यायैनमः
ओंशान्त्यतीतकलात्मिकायैनमः
ओंगम्भीरायैनमः
ओंगगनान्तःस्थायैनमः
ओंगर्वितायैनमः
ओंगानलोलुपायैनमः
ओंकल्पनारहितायैनमः
ओंकाष्ठायैनमः
ओंअकान्तायैनमः
ओंकान्तार्धविग्रहायै(८६०)नमः
ओंकार्यकारणनिर्मुक्तायैनमः
ओंकामकेलितरङ्गितायैनमः
ओंकनत्कनकताटंकायैनमः
ओंलीलाविग्रहधारिण्यैनमः
ओंअजायैनमः
ओंक्षयविनिर्मुक्तायैनमः
ओंमुग्धायैनमः
ओंक्षिप्रप्रसादिन्यैनमः
ओंअन्तर्मुखसमाराध्यायैनमः
ओंबहिर्मुखसुदुर्लभायै(८७०)नमः



ओंत्रय्यैनमः
ओंत्रिवर्गनिलयायैनमः
ओंत्रिस्थायैनमः
ओंत्रिपुरमालिन्यैनमः
ओंनिरामयायैनमः
ओंनिरालम्बायैनमः
ओंस्वात्मारामायैनमः
ओंसुधासृत्यैनमः
ओंपाषण्डपङ्कनिर्मग्न -
- समुद्धरणपण्डितायैनमः
ओंयज्ञप्रियायै(८८०)नमः
ओंयज्ञकर्त्र्यैनमः
ओंयजमानस्वरूपिण्यैनमः
ओंधर्माधारायैनमः
ओंधनाध्यक्षायैनमः
ओंधनधान्यविवर्धिन्यैनमः
ओंविप्रप्रियायैनमः
ओंविप्ररूपायैनमः
ओंविश्वभ्रमणकारिण्यैनमः
ओंविश्वग्रासायैनमः
ओंविद्रुमाभायै(८९०)नमः
ओंवैष्णव्यैनमः
ओंविष्णुरूपिण्यैनमः
ओंअयोन्यैनमः

ओंयोनिनिलयायैनमः
ओंकूटस्थायैनमः
ओंकुलरूपिण्यैनमः
ओंवीरगोष्ठीप्रियायैनमः
ओंवीरायैनमः
ओंनैष्कर्म्यायैनमः
ओंनादरूपिण्यै(९००)नमः
ओंविज्ञानकलनायैनमः
ओंकल्यायैनमः
ओंविदग्धायैनमः
ओंबैन्दवासनायैनमः
ओंतत्वाधिकायैनमः
ओंतत्वमय्यैनमः
ओंतत्वमर्थस्वरूपिण्यैनमः
ओंसामगानप्रियायैनमः
ओंसौम्यायैनमः
ओंसदाशिवकुटुम्बिन्यैनमः(९१०)
ओंसव्यापसव्यमार्गस्थायैनमः
ओंसर्वापद्विनिवारिण्यैनमः
ओंस्वस्थायैनमः
ओंस्वभावमधुरायैनमः
ओंधीरायैनमः
ओंधीरसमर्चितायैनमः
ओंचैतन्यार्घ्यसमाराध्यायैनमः

ओंचैतन्यकुसुमप्रियायैनमः
ओंसदोदितायैनमः
ओंसदातुष्टायै(९२०)नमः
ओंतरुणादित्यपाटलायैनमः
ओंदक्षिणायैनमः
ओंअदक्षिणाराध्यायैनमः
ओंदरस्मेरमुखाम्बुजायैनमः
ओंकौलिनीकेवलायैनमः
ओंअनर्घ्यकैवल्यपद–
- दायिन्यैनमः
ओंस्तोत्रप्रियायैनमः
ओंस्तुतिमत्यैनमः
ओंश्रुतिसंस्तुतवैभवायैनमः
ओंमनस्विन्यै(९३०)नमः
ओंमानवत्यैनमः
ओंमहेश्यैनमः
ओंमंगलाकृत्यैनमः
ओंविश्वमात्रेनमः
ओंजगद्धात्र्यैनमः
ओंविशालाक्ष्यैनमः
ओंसुरागिण्यैनमः
ओंप्रगल्भायैनमः
ओंपरमोदारायैनमः
ओंपरामोदायै(९४०)नमः

ओंमनोमय्यैनमः
ओंव्योमकेश्यैनमः
ओंविमानस्थायैनमः
ओंवज्रिण्यैनमः
ओंवामकेश्वर्यैनमः
ओंपञ्चयज्ञप्रियायैनमः
ओंपञ्चप्रेतमञ्चाधि-
-शायिन्यैनमः
ओंपञ्चम्यैनमः
ओंपञ्चभूतेश्यैनमः
ओंपञ्चसङ्ख्योपचारिण्यै(९५०)नमः
ओंशाश्वत्यैनमः
ओंशाश्वतैश्वर्यायैनमः
ओंशर्मदायैनमः
ओंशम्भुमोहिन्यैनमः
ओंधरायैनमः
ओंधरसुतायैनमः
ओंधन्यायैनमः
ओंधर्मिण्यैनमः
ओंधर्मवर्धिन्यैनमः
ओंलोकातीतायै(९६०)नमः
ओंगुणातीतायैनमः
ओंसर्वातीतायैनमः
ओंशामात्मिकायैनमः



ओंबन्धूककुसुमप्रख्यायैनमः
ओंबालायैनमः
ओंलीलाविनोदिन्यैनमः
ओंसुमंगल्यैनमः
ओंसुखकर्यैनमः
ओंसुवेषाढ्यायैनमः
ओंसुवासिन्यै(९७०)नमः
ओंसुवासिन्यर्चनप्रीतायैनमः
ओंआशोभनायैनमः
ओंशुद्धमानसायैनमः
ओंबिन्दुतर्पणसन्तुष्टायैनमः
ओंपूर्वजायैनमः
ओंत्रिपुराम्बिकायैनमः
ओंदशमुद्रासमाराध्यायैनमः
ओंत्रिपुराश्रीवशङ्कर्यैनमः
ओंज्ञानमुद्रायैनमः
ओंज्ञानगम्यायै(९८०)नमः
ओंज्ञानज्ञेयस्वरूपिण्यैनमः
ओंयोनिमुद्रायैनमः

ओंत्रिखण्डेश्यैनमः
ओंत्रिगुणायैनमः
ओंअम्बायैनमः\
ओंत्रिकोणगायैनमः
ओंअनघायैनमः
ओंअद्भुतचारित्रायैनमः
ओंवाञ्छितार्थप्रदायिन्यैनमः
ओंअभ्यासातिशयज्ञातायै(९९०) नमः
ओंषडध्वातीतरूपिण्यैनमः
ओंअव्याजकरुणामूर्तयेनमः
ओंअज्ञानध्वान्तदीपिकायैनमः
ओंआबालगोपविदितायैनमः
ओंसर्वानुल्लङ्घ्यशासनायैनमः
ओंश्रीचक्रराजनिलयायैनमः
ओंश्रीमत्त्रिपुरसुन्दर्यैनमः
ओंश्रीशिवायैनमः
ओंशिवशक्त्यैक्यरूपिण्यैनमः
ओंललिताम्बिकायै(१०००)नमः

**॥इतिश्रीललितसहस्र नामावलिःसम्पूर्णा॥**

# ॥श्रीललिता-त्रिशती-स्तोत्रम्॥

**अगस्त्यउवाच**

हयग्रीवदयासिन्धोभगवन्शिष्यवत्सल।
त्वत्तःश्रुतमशेषेणश्रोतव्यंयद्यदस्तिततत्॥१॥
रहस्यनामसाहस्रमपित्वत्तःश्रुतंमया।
इतःपरंमेनास्त्येवश्रोतव्यमितिनिश्चयः॥२॥
तथापिममचित्तस्यपर्याप्तिर्नैवजायते।
कात्स्न्यार्थःप्राप्यइत्येवशोचयिष्याम्यहंप्रभो॥३॥
किमिदंकारणंब्रूहिज्ञातव्यांशोऽस्तिवापुनः।
अस्तिचेन्ममतद्ब्रूहिब्रूहीत्युक्त्वाप्रणम्यतम्॥४॥

**सूतउवाच**

समाललम्बेतत्पादयुगळंकलशोद्भवः।
हयाननोभीतभीतःकिमिदंकिमिदंत्विति॥५॥
मुञ्चमुञ्चेतितंचोक्त्वाचिन्ताक्रान्तोबभूवसः।
चिरंविचार्यनिश्चिन्वन्वक्तव्यंनमयेत्यसौ॥६॥
तूष्णींस्थितःस्मरन्नाज्ञांललिताम्बाकृतांपुरा।
प्रणम्यविप्रंसमुनिस्तत्पादावत्यजन्स्थितः॥७॥
वर्षत्रयावधितथागुरुशिष्यौतथास्थितौ।
तच्छृण्वन्तश्चपश्यन्तःसर्वेलोकाःसुविस्मिताः॥८॥
तत्रश्रीललितादेवीकामेश्वरसमन्विता।
प्रादुर्भूतारहस्येवं हयग्रीवमवोचत॥९॥

**श्रीदेव्युवाच**

अश्वाननावयोःप्रीतिःशास्त्रविश्वासिनेत्वयि।
राज्यंदेयंशिरोदेयंनदेयाषोडशाक्षरी॥१०॥



स्वमातृजारवत्गोप्याविद्यैषेत्यागमाजगुः।
ततोऽतिगोपनियामेसर्वपूर्तिकरीस्तुतिः॥११॥
मयाकामेश्वरेणापिकृत्वासा गोपिताभृशम्।
मदाज्ञयावचोदेव्यश्च क्रुर्नामसहस्रकम्॥१२॥
आवाभ्यांकथितामुख्यासर्वपूर्तिकरीस्तुतिः।
सर्वक्रियाणांवैकल्यपूर्तिर्यज्जपतोभवेत्॥१३॥
सर्वपूर्तिकरंतस्मादिदंनामकृतंमया।
तद्ब्रूहित्वमगस्त्यायपात्रमेवनसंशयः॥१४॥
पत्न्यस्यलोपामुद्राख्यामामुपास्तेऽतिभक्तितः।
अयञ्चनितरांभक्तस्तस्मादस्यवदस्वतत्॥१५॥
अमुञ्चमानस्त्वत्पादौवर्षत्रयमसौस्थितः।
एतज्ज्ञातुमतोभक्त्याहीदमेवनिदर्शनम्॥१६॥
चित्तपर्याप्तिरेतस्यनान्यथासम्भविष्यती।
सर्वपूर्तिकरंतस्मादनुज्ञातोमयावद॥१७॥

**सूतउवाच**

इत्युक्त्वान्तर्दधादम्बाकामेश्वरसमन्विता।
अथोत्थाप्यहयग्रीवःपाणिभ्यांकुम्भसम्भवम्॥१८॥
संस्थाप्यनिकटेवाचमुवाचभृशविस्मितः।

**हयग्रीवउवाच**

कृतार्थोऽसिकृतार्थोऽसिकृतार्थोऽसिघटोद्भव॥१९॥
त्वत्समोललिताभक्तोनास्तिनास्तिजगत्त्रये।
येनागस्त्यस्वयंदेवीतववक्तव्यमन्वशात्॥२०॥
सच्छिष्येनत्वयाचाहंदृष्ट्वानस्मितांशिवाम्।
यतन्तेदर्शनार्थायब्रह्मविष्णवीशपूर्वकाः॥२१॥

अतःपरंतेवक्ष्यामिसर्वपूर्तिकरंस्तवम्।
यस्यस्मरणमात्रेणपर्याप्तिस्तेभवेद्धृदि॥२२॥
रहस्यनामसाहस्रादपिगुह्यतमंमुने।
आवश्यकंततोऽप्येतल्ललितांसमुपासितुम्॥२३॥
तदहंसम्प्रवक्ष्यामिललिताम्बानुशासनात्।
श्रीमत्पञ्चदशाक्षर्याःकादिवर्णक्रमान्मुने॥२४॥
पृथग्विंशतिनामानिकथितानिघटोद्भव।
आहत्यनाम्नांत्रिशतीसर्वसम्पूर्तिकारणी॥२५॥
रहस्यादिरहस्यैषागोपनीयाप्रयत्नतः।
तांशृणुष्वमहाभागसावधानेनचेतसा॥२६॥
केवलंनामबुद्धिस्तेनकार्यातेषुकुम्भज।
मन्त्रात्मकंएतेषांनाम्नांनामात्मतापिच॥२७॥
तस्मादेकाग्रमनसाश्रोतव्यंचत्वयासदा।

**सूतउवाच**

इत्युक्त्वातंहयग्रीवःप्रोचेनामशतत्रयम्॥२८॥

**॥इतिश्रीललितात्रिशती-स्तोत्र-पूर्वभागः॥**

**संकल्पः**

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं प्रसन्नवदनं ध्यायेत्
सर्वविघ्नोपशान्तये ॥
प्राणायामः॥
ममोपात्त ---------------- परमेश्वरी प्रीत्यर्थं श्रीललिता महात्रिपुरसुन्दरी प्रसाद सिद्धिद्वारा मम धर्मार्थकाममोक्ष चतुर्विदपुरुषार्थफल सिद्ध्यर्थं



सर्वमंगल अवाप्त्यर्थंश्रीललितात्रिशतीस्तोत्र पारायणं / अर्चनं करिष्ये ।

**ऋष्यादि न्यासः**

अस्यश्रीललितात्रिशतीस्तोत्रमहामन्त्रस्यभगवान्हयग्रीवऋषिः।
अनुष्टप्छन्दः।श्रीललितामहात्रिपुरसुन्दरीदेवता।
ऐंबीजम्।सौःशक्तिः। क्लींकीलकम्।
श्रीललितामहात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे पारायणे / अर्चनेविनियोगः।

**॥करन्यासः॥**ऐंअङ्गुष्ठाभ्यांनमः।क्लींतर्जनीभ्यांनमः।सौःमध्यमाभ्यांनमः।ऐंअनामिकाभ्यांनमः।क्लींकनिष्ठिकाभ्यांनमः।सौःकरतलकरपृष्ठाभ्यांनमः।

**॥अङ्गन्यासः॥**ऐंहृदयायनमः।क्लींशिरसेस्वाहा।सौःशिखायैवषट्।
ऐंकवचायहुं।क्लींनेत्रत्रयायवौषट्।सौःअस्त्रायफट्।
भूर्भवस्सुवरोमितिदिग्बन्धः।

*** पञ्चदश्युपदिष्टाः पञ्चदशीकूटत्रयेण न्यसेत् ।**

**॥ध्यानम्॥**

अतिमधुरचापहस्तामपरिमितामोदबाणसौभाग्याम्।
अरुणामतिशयकरुणामभिनवकुलसुन्दरींवन्दे॥

**॥लमित्यादिपञ्चपूजा॥**

लंपृथिव्यात्मिकायैगन्धंकल्पयामि।
हंआकाशात्मिकायैपुष्पंकल्पयामि।
यंवाय्वात्मिकायैधूपं कल्पयामि।
रंवह्यात्मिकायैदीपंकल्पयामि।
वंअमृतात्मिकायैअमृतंमहानैवेद्यंकल्पयामि।
संसर्वात्मिकायैसर्वोपचारपूजांकल्पयामि॥

# ॥श्रीललितात्रिशतीस्तोत्रम्॥

**हयग्रीवउवाच**

ककाररूपाकल्याणीकल्याणगुणशालिनी।
कल्याणशैलनिलयाकमनीयाकलावती॥१॥
कमलाक्षीकल्मषघ्नीकरुणामृतसागरा।
कदम्बकाननावासाकदम्बकुसुमप्रिया॥२॥
कन्दर्पविद्याकन्दर्पजनकापाङ्गवीक्षणा।
कर्पूरवीटीसौरभ्यकल्लोलितककुप्तटा॥३॥
कलिदोषहराकञ्जलोचनाकम्रविग्रहा।
कर्मादिसाक्षिणीकारयित्रीकर्मफलप्रदा॥४॥
एकाररूपाचैकाक्षर्येकानेकाक्षराकृतिः।
एतत्तदित्यनिर्देश्याचैकानन्दचिदाकृतिः॥५॥
एवमित्यागमाबोध्याचैकभक्तिमदर्चिता।
एकाग्रचित्तनिर्ध्याताचैकदाम्पत्यवेदिता॥६॥
एलासुगन्धिचिकुराचैनःकूटविनाशिनी।
एकभोगाचैकरसाचैकैश्वर्यप्रदायिनी॥७॥
एकातपत्रसाम्राज्यप्रदाचैकान्तपूजिता।
एधमानप्रभाचैजदनेजज्जगदीश्वरी॥८॥
एकवीरादिसंसेव्याचैकप्राभवशालिनी।
ईकाररूपाचेशित्रीचेप्सितार्थप्रदायिनी॥९॥
ईदृगित्यविनिर्देश्याचेश्वरत्वविधायिनी।
ईशानादिब्रह्ममयीचेशित्वाद्यष्टसिद्धिदा॥१०॥
ईक्षित्रीक्षणसृष्टाण्डकोटिरीश्वरवल्लभा।
ईडिताचेश्वरार्धाङ्गशरीरेशाधिदेवता॥११॥



ईश्वरप्रेरणकरीचेशताण्डवसाक्षिणी।
ईश्वरोत्सङ्गनिलयाचेतिबाधाविनाशिनी॥१२॥
ईहाविराहिताचेशशक्तिरीषत्स्मितानना।
लकाररूपाललितालक्ष्मीवाणीनिषेविता॥१३॥
लाकिनीललनारूपालसद्दाडिमपाटला।
ललन्तिकालसत्फालाललाटनयनार्चिता॥१४॥
लक्षणोज्ज्वलदिव्याङ्गीलक्षकोट्यण्डनायिका।
लक्ष्यार्थालक्षणागम्यालब्धकामालतातनुः॥१५॥
ललामराजदलिकालम्बिमुक्तालताञ्चिता।
लम्बोदरप्रसूर्लभ्यालज्जाढ्यालयवर्जिता॥१६॥
ह्रींकाररूपाह्रींकारनिलयाह्रींपदप्रिया।
ह्रींकारबीजाह्रींकारमन्त्राह्रींकारलक्षणा॥१७॥
ह्रींकारजपसुप्रीताह्रींमतीह्रींविभूषणा।
ह्रींशीलाह्रींपदाराध्याह्रींगर्भाह्रींपदाभिधा॥१८॥
ह्रींकारवाच्याह्रींकारपूज्याह्रींकारपीठिका।
ह्रींकारवेद्याह्रींकारचिन्त्याह्रींह्रींशरीरिणी॥१९॥
हकाररूपाहलधृत्पूजिताहरिणेक्षणा।
हरप्रियाहराराध्याहरिब्रह्मेन्द्रसेविता॥२०॥
हयारूढासेवितांघ्रिर्हयमेधसमर्चिता।
हर्यक्षवाहनाहंसवाहनाहतदानवा॥२१॥
हत्यादिपापशमनीहरिदश्वादिसेविता।
हस्तिकुम्भोत्तुङ्ककुचाहस्तिकृत्तिप्रियाङ्गना॥२२॥
हरिद्राकुङ्कुमादिग्धाहर्यश्वाद्यमरार्चिता।
हरिकेशसखीहादिविद्याहालामदालसा॥२३॥

सकाररूपासर्वज्ञासर्वेशीसर्वमङ्गला।
सर्वकर्त्रीसर्वभर्त्रीसर्वहन्त्रीसनातनी॥२४॥
सर्वानवद्यासर्वाङ्गसुन्दरीसर्वसाक्षिणी।
सर्वात्मिकासर्वसौख्यदात्रीसर्वविमोहिनी॥२५॥
सर्वाधारासर्वगतासर्वावगुणवर्जिता।
सर्वारुणासर्वमातासर्वाभरणभूषिता॥२६॥
ककारार्थाकालहन्त्रीकामेशीकामितार्थदा।
कामसञ्जीविनीकल्याकठिनस्तनमण्डला॥२७॥
करभोरुःकलानाथमुखीकचजिताम्भुदा।
कटाक्षस्यन्दिकरुणाकपालिप्राणनायिका॥२८॥
कारुण्यविग्रहाकान्ताकान्तिधूतजपावलिः।
कलालापाकम्बुकण्ठीकरनिर्जितपल्लवा॥२९॥
कल्पवल्लीसमभुजाकस्तूरीतिलकाञ्चिता।
हकारार्थाहंसगतिर्हाटकाभरणोज्ज्वला॥३०॥
हारहारिकुचाभोगाहाकिनीहल्यवर्जिता।
हरित्पतिसमाराध्याहठात्कारहतासुरा॥३१॥
हर्षप्रदाहविर्भोक्त्रीहार्दसन्तमसापहा।
हल्लीसलास्यसन्तुष्टाहंसमन्त्रार्थरूपिणी॥३२॥
हव्यवाहादि संसेव्या हर्षिणीहरिसोदरी।
हाहाहूहूमुखस्तुत्याहानिवृद्धिविवर्जिता॥३३॥
हय्यङ्गवीनहृदयाहरिकोपारुणांशुका।
लकाराख्यालतापूज्यालयस्थित्युद्भवेश्वरी॥३४॥
लास्यदर्शनसन्तुष्टालाभालाभविवर्जिता।
लङ्घ्येतराज्ञालावण्यशालिनीलघुसिद्धिदा॥३५॥



लाक्षारससवर्णाभालक्ष्मणाग्रजपूजिता।
लब्दानान्दालब्धभक्तिसुलभालाङ्गलायुधा॥३६॥
लग्नचामरहस्तश्रीशारदापरिवीजिता।
लज्जापदसमाराध्यालम्पटालकुलेश्वरी॥३७॥
लब्धमानालब्धरसालब्धसम्पत्समुन्नतिः।
ह्रींकारिणीह्रींकाराध्याह्रींमध्याह्रींशिखामणिः॥३८॥
ह्रींकारकुण्डाग्निशिखाह्रींकारशशिचन्द्रिका।
ह्रींकारभास्कररुचिर्ह्रींकारांभोदचञ्चला॥३९॥
ह्रींकारकन्दाङ्कुरिकाह्रींकारैकपरायणा।
ह्रींकारदीर्घिकाहंसीह्रींकारोद्यानकेकिनी॥४०॥
ह्रींकारारण्यहरिणीह्रींकारावालवल्लरी।
ह्रींकारपञ्जरशुकीह्रींकाराङ्गणदीपिका॥४१॥
ह्रींकारकन्दरासिंहीह्रींकाराम्भोजभृङ्गिका।
ह्रींकारसुमनोमाध्वीह्रींकारतरुमंजरी॥४२॥
सकाराख्यासमरसासकलागमसंस्तुता।
सर्ववेदार्थतात्पर्यभूमिःसदसदाश्रया॥४३॥
सकलासच्चिदानन्दासाध्वी सद्गतिदायिनी।
सनकादिमुनिध्येयासदाशिवकुटुम्बिनी॥४४॥
सकालाधिष्ठानरूपासत्यरूपासमाकृतिः।
सर्वप्रपञ्चनिर्मात्रीसमनाधिकवर्जिता॥४५॥
सर्वोत्तुङ्गासङ्गरूपासगुणासकलेष्टदा।
ककारिणीकाव्यलोलाकामेश्वरमनोहरा॥४६॥
कामेश्वरप्रणानाडीकामेशोत्सङ्गवासिनी।
कामेश्वरालिङ्गिताङ्गीकमेश्वरसुखप्रदा॥४७॥

कामेश्वरप्रणयिनीकामेश्वरविलासिनी।
कामेश्वरतपःसिद्धिःकामेश्वरमनःप्रिया॥४८॥
कामेश्वरप्राणनाथाकामेश्वरविमोहिनी।
कामेश्वरकल्पलताकामेश्वरगृहेश्वरी॥४९॥
कामेश्वराह्लादकरीकामेश्वरमहेश्वरी।
कामेश्वरीकामकोटिनिलयाकाङ्क्षितार्थदा॥५०॥
लकारिणीलब्धरूपालब्धधीर्लब्धवाञ्चिता।
लब्धपापमनोदूरालब्धाहङ्कारदुर्गमा॥५१॥
लब्धशक्तिर्लब्धदेहालब्धैश्वर्यसमुन्नतिः।
लब्धबुधिर्लब्धलीलालब्धयौवनशालिनी॥५२॥
लब्धातिशयसर्वाङ्गसौन्दर्यालब्धविभ्रमा।
लब्धरागालब्धपतिर्लब्धनानागमस्थितिः॥५३॥
लब्धभोगालब्धसुखालब्धहर्षाभिपूजिता।
ह्रींकारमूर्तिः ह्रींकारसौधशृङ्गकपोतिका॥५४॥
ह्रींकारदुग्धाब्धिसुधाह्रींकारकमलेन्दिरा।
ह्रींकारमणिदीपार्चिर्ह्रींकारतरुशारिका॥५५॥
ह्रींकारपेटकमणिर्ह्रींकारदर्शबिम्बिता।
ह्रींकारकोशासिलताह्रींकारास्थाननर्तकी॥५६॥
ह्रींकारशुक्तिकामुक्तामणिर्ह्रींकारबोधिता।
ह्रींकारमयसौवर्णस्तम्भविद्रुमपुत्रिका॥५७॥
ह्रींकारवेदमध्यस्थाह्रींकाराध्वरदक्षिणा।
ह्रींकारनन्दनारामनवकल्पकवल्लरी॥५८॥
ह्रींकारहिमवद्गङ्गाह्रींकारार्णवकौस्तुभा।
ह्रींकारमन्त्रसर्वस्वाह्रींकारपरसौख्यदा॥५९॥



**॥इतिश्रीहयग्रीवागस्त्य संवादे स्तोत्रखण्डे**
**श्रीललितात्रिशतीस्तोत्रंसम्पूर्णम्॥**

**॥अङ्गन्यासः॥**ऐंहृदयायनमः।क्लींशिरसेस्वाहा।सौःशिखायैवषट्।
ऐंकवचायहुं।क्लींनेत्रत्रयायवौषट्।सौःअस्त्रायफट्।
भूर्भुवस्सुवरोमितिदिग्बन्धः।
*** पञ्चदश्युपदिष्टाः पञ्चदशीकूटत्रयेण न्यसेत् ।**
**॥ध्यानम्॥**
अतिमधुरचापहस्तामपरिमितामोदबाणसौभाग्याम्।
अरुणामतिशयकरुणामभिनवकुलसुन्दरींवन्दे॥
**॥लमित्यादिपञ्चपूजा॥**

**॥ फलश्रुतिः ॥**
**हयग्रीवउवाच**
इत्येवंतेमयाख्यातंदेव्यानामशतत्रयम्।
रहस्यातिरहस्यत्वाद्गोपनीयंत्वयामुने॥१॥
शिववर्णानिनामानिश्रीदेव्याकथितानिहि।
शक्त्यक्षराणिनामानिकामेशकथितानिच॥२॥
उभयाक्षरनामानिह्युभाभ्यांकथितानिवै।
तदन्यैर्ग्रथितंस्तोत्रमेतस्यसदृशंकिमु॥३॥
नानेनसदृशंस्तोत्रंश्रीदेवीप्रीतिदायकम्।
लोकत्रयेऽपिकल्याणंसम्भवेन्नात्रसंशयः॥४॥
**सूतउवाच**
इतिहयमुखगीतंस्तोत्रराजंनिशम्य
प्रगलितकलुषोऽभूच्चित्तपर्याप्तिमेत्य।

निजगुरुमथनत्वाकुम्भजन्मातदुक्तं
पुनरधिकरहस्यंज्ञातुमेवंजगाद॥५॥

**अगस्त्यउवाच**

अश्वाननमहाभागरहस्यमपिमेवद।
शिववर्णानिकान्यत्रशक्तिवर्णानिकानिहि॥६॥
उभयोरपिवर्णानिकानिवावददेशिक।
इतिपृष्टःकुम्भजेनहयग्रीवोऽवदत्पुनः॥७॥

**हयग्रीवउवाच**

तवगोप्यंकिमस्तीहसाक्षादम्बानुशासनात्।
इदंत्वतिरहस्यंतेवक्ष्यामिश्रुणु कुम्भज॥८॥
एतद्विज्ञनमात्रेणश्रिविद्यासिद्धिदाभवेत्।
कत्रयंहद्वयंचैवशैवोभागःप्रकीर्तितः॥९॥
शक्तयक्षराणिशेषाणिह्रीङ्कारउभयात्मकः।
एवंविभागमज्ञात्वाश्रीविद्याजपशालिनः॥१०॥
नतेषांसिद्धिदाविद्याकल्पकोटिशतैरपि।
चतुर्भिःशिवचक्रैश्चशक्तिचक्रैश्चपञ्चभिः॥११॥
नवचक्रैश्चसंसिद्धंश्रीचक्रंशिवयोर्वपुः।
त्रिकोणमष्टकोणंचदशकोणद्वयंतथा॥१२॥
चतुर्दशारंचैतानिशक्तिचक्राणिपञ्चच।
बिन्दुश्चाष्टदलंपद्मंपद्मंषोडशपत्रकम्॥१३॥
चतुरश्रंचचत्वारिशिवचक्राण्यनुक्रमात्।
त्रिकोणेबैन्दवंश्लिष्टंअष्टारेष्टदलाम्बुजम्॥१४॥
दशारयोःषोडशारंभूगृहंभुवनाश्रके।
शैवानामपिशाक्तानांचक्राणांचपरस्परं॥१५॥



अविनाभावसम्बन्धंयोजानातिसचक्रवित्।
त्रिकोणरूपिणिशक्तिर्बिन्दुरूपश्शिवस्मृतः॥१६॥
अविनाभावसम्बन्धंतस्माद्बिन्दुत्रिकोणयोः।
एवंविभागमज्ञात्वाश्रीचक्रंयःसमर्चयेत्॥१७॥
नतत्फलमवाप्नोतिललिताम्बानतुष्यति।
येचजानन्तिलोकेऽस्मिन्श्रीविद्याचक्रवेदिनः॥१८॥
सामान्यवेदिनःसर्वेविशेषज्ञोऽतिदुर्लभः।
स्वयंविद्याविशेषज्ञोविशेषज्ञंसमर्चयेत्॥१९॥
तस्मैःदेयंततोग्राह्यं श्रीविद्याचक्रवेदिना।
अन्धन्तमःप्रविशन्तियेह्यविद्यामुपासते॥२०॥
इतिश्रुतिरपाहैतानविद्योपासकान्पुनः।
विद्यानुपासकानेवनिन्दत्यारुणिकीश्रुतिः॥२१॥
अश्रुतासश्रुतासश्चयज्वानोयेऽप्ययज्वनः।
स्वर्यन्तोनापेक्षन्तेइन्द्रमग्निं चयेविदुः॥२२॥
सिकताइवसंयन्तिरश्मिभिःसमुदीरिताः।
अस्माल्लोकादमुष्माच्चेत्याहचारण्यकश्रुतिः॥२३॥
यस्यनोपश्चिमंजन्मयदिवाशङ्करःस्वयम्।
तेनैवलभ्यतेविद्याश्रीमत्पच्चदशाक्षरी॥२४॥
इतिमन्त्रेषुबहुधाविद्यायामहिमोच्यते।
मोक्षैकहेतुविद्यातुश्रीविद्यानात्रसंशयः॥२५॥
नशिल्पादिज्ञानयुक्तेविद्वच्छब्दःप्रयुज्यते।
मोक्षैकहेतुविद्यासाश्रीविद्यैवनसंशयः॥२६॥
तस्माद्विद्याविदेदद्यात् ख्यापयेत्तद्गुणान्सुधीः ।
स्वयंविद्याविशेषज्ञोविद्यामाहात्म्यमवेद्यपि ॥२७॥

विद्याविदंनार्चयेच्चेत् कोवातंपूजयेज्जनः॥२८॥
प्रसङ्गादेतदुक्तंतेप्रकृतंशृणुकुम्भज।
यःकीर्तयेत्सकृत्भक्तयादिव्यं नाम्नां शतत्रयम्॥२९॥
तस्यपुण्यफलंवक्ष्येविस्तरेण घटोद्भव।
रहस्यनामसाहस्रपाठेयत्फलमीरितम्॥३०॥
तत्फलाकोटिगुणितमेकनामजपाद्भवेत्।
कामेश्वराभ्यांतदिदं कृतंनामशतत्रयम्॥३१॥
नान्येनतुलयेदेतत्स्तोत्रेणान्यकृतेनतु।
श्रियःपरम्परायस्यभाविनी तूत्तरोत्तरम्॥३२॥
तेनैवलभ्यतेनाम्नां त्रिशती सर्वकामदा।
अस्यानाम्नांत्रिशत्यास्तुमहिमाकेनवर्ण्यते ॥३३॥
यास्वयंशिवयोर्वक्त्र पद्माभ्यांपरिनिस्सृता।
नित्या षोडशिकारूपान्विप्रानादौतुभोजयेत्॥३४॥
अभ्यक्तान् गन्धततैलेनस्नातानुष्णेनवारिणा।
अभ्यर्चवस्त्रगन्धाद्यैःकामेश्वर्यादिनामभिः॥३५॥
अपूप शर्कराज्यैस्च फलैः पुष्पैस्सुगन्धिभिः।
विद्याविदोविशेषेणभोजयेत्षोडशद्विजान्॥३६॥
एवंनित्यार्चनंकुर्यातादौब्राह्मणभोजनम्।
पश्चात्त्रिशत्या नामनां तु ब्राह्मणान्क्रमशोऽर्चयेत्॥३७॥
तैलाभ्यङ्गातिकंदत्वाविभवेसतिभक्तितः।
शुक्लप्रतिपदारभ्यपौर्णमास्यवधिक्रमात्॥३८॥
दिवसेदिवसेविप्राभोज्याविम्शतिसङ्ख्यया।
दशभिःपञ्चभिर्वापित्रीभिरेकेन वादिनैः॥३९॥



त्रिम्शत्षष्टिःशतंविप्रान्भोजयेत् त्रिशतंक्रमात्।
एवंयःकुरुतेभक्त्याजन्ममध्येसकृन्नरः॥४०॥
तस्यैवंसफलंजन्ममुक्तिस्तस्यकरेस्थिता।
रहस्यनामसाहस्रैरर्चनेप्येवमेव हि॥४१॥
आदौनित्यबलिंकुर्यात्पश्चात् ब्राह्मणभोजनम्।
रहस्यनामसाहस्रमहिमायोमयोदितः॥४२॥
सशीकराणुरत्रैकनाम्नोमहिमवारिधेः।
वाग्देवीरचितेनामसाहस्रेयद्यदीरितम्॥४३॥
तत्फलमवाप्नोतिनाम्नोऽप्येकस्य कीर्तनात्।
एतदन्यैर्जपैःस्तोत्रैरर्चनैर्यत्फलंभवेत्॥४४॥
तत्फलंकोटिगुणितंभवेन्नामशतत्रयात्।
रहस्यनामसाहस्र कोट्यावृत्यास्तु यत्फलं ॥४५॥
तद्भवेत्कोतिगुणितं नाम त्रिशतकीर्तनात्।
वाग्देविरचितास्तोत्रेतादृशोमहिमायदि॥४६॥
साक्षात्कामेशकामेशीकृतेऽस्मिन्गृह्यतामिति।
सकृत्सन्कीर्तनादेवनाम्नामस्मिन् शतत्रये॥४७॥
भवेच्चित्तस्यपर्याप्तिर्नून मन्यानपेक्षिणी।
नज्ञातव्यमितस्त्वन्यज्जगत्सर्वं चकुम्भज॥४८॥
यद्यत्साध्यतमंकार्यंतत्तदर्थमिदं जपेत्।
तत्तत्फलमवाप्नोतिपश्चात्कार्यंपरीक्षयेत्॥४९॥
येयेप्रयोगास्तन्त्रेषुतैस्तैर्यत्साध्यतेफलं।
तत्सर्वंसिद्धयतिक्षिप्रंनामत्रिशतकीर्तनात्॥५०॥
आयुष्करंपुष्टिकरंपुत्रदंवश्यकारकम्।
विद्याप्रदंकीर्तिकरंसुकवित्वप्रदायकम्॥५१॥

सर्वसम्पत्प्रदंसर्वभोगदंसर्वसौख्यदम्।
सर्वाभिष्टप्रदंचैवदेव्यानामशतत्रयम्॥५२॥
एतज्जपपरोभूयान्नान्यदिच्छेत्कदाचन।
एतत्कीर्तनसन्तुष्टाश्रीदेवीललिताम्बिका॥५३॥
भक्तस्ययद्यदिष्टंस्यात्तत्तत्पूरयतेध्रुवं।
तस्मात्कुभोद्भवमुनेकीर्तयत्वमिदम्सदा॥५४॥
अपरंकिञ्चिदपितेबोद्धव्यंनावशिष्यते।
इतितेकथितंस्तोत्रललिताप्रीतिदायकम्॥५५॥
नाविद्यावेदिनेब्रूयान्नाभक्तायकदाचन।
नशठायनदुष्टायनाविश्वासायकर्हिचित्॥५६॥
योब्रूयात्रिशतींनाम्नांतस्यानर्थोमहान्भवेत्।
इत्याज्ञाशाङ्करीप्रोक्तातस्माद्गोप्यमिदंत्वया॥५७॥
ललिताप्रेरितेनैवमयोक्तम्स्तोत्रमुत्तमम्।
रहस्यनामसाहस्रादपिगोप्यमिदंमुने॥५८॥

**सूतउवाच**

एवमुक्त्वाहयग्रीवःकुम्भजंतापसोत्तमम्।
स्तोत्रेणानेनललितांस्तुत्वात्रिपुरसुन्दरी॥
आनन्दलहरीमग्नरमानसःसमवर्तत॥५९॥

**॥इतिश्रीब्रह्माण्डपुराणेश्रीहयग्रीवागस्त्यसंवादेश्री ललितोपाख्याने स्तोत्रखण्डेश्रीललिताम्बा त्रिशतीस्तोत्रंसम्पूर्णम्॥**



**॥श्रीललितात्रिशती नामावलिः॥**

ओं ककाररूपायैनमः
ओं कल्याण्यै नमः
ओं कल्याणगुणशालिन्यैनमः
ओं कल्याणशैलनिलयायैनमः
ओं कमनीयायैनमः
ओं कलावत्यैनमः
ओं कमलाक्ष्यैनमः
ओं कल्मषघ्न्यैनमः
ओं करुणामृतसागरायैनमः
ओं कदम्बकाननावासायैनमः
ओंकदम्बकुसुमप्रियायैनमः
ओंकन्दर्पविद्यायैनमः
ओंकन्दर्पजनकापाङ्गवीक्षणायै नमः
ओंकर्पूरवीटीसौरभ्य-कल्लोलितककुप्तटायैनमः
ओंकलिदोषहरायैनमः
ओंकञ्जलोचनायैनमः
ओंकम्रविग्रहायैनमः
ओंकर्मादिसाक्षिण्यैनमः
ओंकारयित्र्यैनमः
ओंकर्मफलप्रदायैनमः२०
ओंएकाररूपायैनमः
ओंएकाक्षर्यैनमः
ओंएकानेकाक्षराकृत्यैनमः
ओंएतत्तदित्यनिर्देश्यायैनमः
ओंएकानन्दचिदाकृत्यैनमः
ओंएवमित्यागमाबोध्यायैनमः
ओंएकभक्तिमदर्चितायैनमः
ओंएकाग्रचितनिर्ध्यातायैनमः
ओंएकदाम्पत्यवेदितायैनमः
ओंएलासुगन्धिचिकुरायैनमः
ओंएनःकूटविनाशिन्यैनमः
ओंएकभोगायैनमः
ओंएकरसायैनमः
ओंएकैश्वर्यप्रदायिन्यैनमः
ओंएकातपत्रसाम्राज्यप्रदायैनमः
ओंएकान्तपूजितायैनमः
ओंएधमानप्रभायैनमः
ओंएजदनेजज्जगदीश्वर्यैनमः
ओंएकवीरादिसंसेव्यायैनमः
ओंएकप्राभवशालिन्यैनमः४०
ओंईकाररूपायैनमः
ओंईशित्र्यैनमः
ओंईप्सितार्थप्रदायिन्यैनमः
ओंईदृगित्याविनिर्देश्यायैनमः

ओंईश्वरत्वविधायिन्यैनमः
ओंईशानादिब्रह्ममय्यैनमः
ओंईशित्वाद्यष्टसिद्धिदायैनमः
ओंईक्षित्र्यैनमः
ओंईक्षणसृष्टाण्डकोट्यैनमः
ओंईश्वरवल्लभायैनमः
ओंईडितायैनमः
ओंईश्वरार्धाङ्गशरीरायैनमः
ओंईशादिदेवतायैनमः
ओंईश्वरप्रेरणकर्यैनमः
ओंईशताण्डवसाक्षिण्यैनमः
ओंईश्वरोत्सङ्गनिलयायैनमः
ओंईतिबाधाविनाशिन्यैनमः
ओंईहाविरहितायैनमः
ओंईशशक्त्यैनमः
ओंईषत्स्मिताननायैनमः६०
ओंलकाररूपायैनमः
ओंललितायैनमः
ओंलक्ष्मीवाणीनिषेवितायैनमः
ओंलाकिन्यैनमः
ओंललनारूपायैनमः
ओंलसद्दाडिमपाटलायैनमः
ओंललन्तिकालसत्फालायैनमः
ओंललाटनयनार्चितायैनमः

ओंलक्षणोज्ज्वलदिव्याङ्ग्यैनमः
ओंलक्षकोट्यण्डनायिकायैनमः
ओंलक्ष्यार्थायैनमः
ओंलक्षणागम्यायैनमः
ओंलब्धकामायैनमः
ओंलतातनवेनमः
ओंललामराजदलिकायैनमः
ओंलंबिमुक्तालताञ्चितायैनमः
ओंलम्बोदरप्रसुवेनमः
ओंलभ्यायैनमः
ओंलज्जाढ्यायैनमः
ओंलयवर्जितायैनमः८०
ओंह्रींकाररूपायैनमः
ओंह्रींकारनिलयायैनमः
ओंह्रींपदप्रियायैनमः
ओंह्रींकारबीजायैनमः
ओंह्रींकारमन्त्रायैनमः
ओंह्रींकारलक्षणायैनमः
ओंह्रींकारजपसुप्रीतायैनमः
ओंह्रींमत्यैनमः
ओंह्रींविभूषणायैनमः
ओंह्रींशीलायैनमः
ओंह्रींपदाराध्यायैनमः
ओंह्रींगर्भायैनमः



ओंह्रींपदाभिधायैनमः
ओंह्रींकारवाच्यायैनमः
ओंह्रींकारपूज्यायैनमः
ओंह्रींकारपीठिकायैनमः
ओंह्रींकारवेद्यायैनमः
ओंह्रींकारचिन्त्यायैनमः
ओंह्रींनमः
ओंह्रींशरीरिण्यैनमः१००
ओंहकाररूपायैनमः
ओंहलधृत्पूजितायैनमः
ओंहरिणेक्षणायैनमः
ओंहरप्रियायैनमः
ओंहराराध्यायैनमः
ओंहरिब्रह्मेन्द्रसेवितायैनमः
ओंहयारूढासेवितांघ्र्यैनमः
ओंहयमेधसमर्चितायैनमः
ओंहर्यक्षवाहनायैनमः
ओंहंसवाहनायैनमः
ओंहतदानवायैनमः
ओंहत्यादिपापशमन्यैनमः
ओंहरिदश्वादिसेवितायैनमः
ओंहस्तिकुम्भोत्तुङ्गकुचायैनमः
ओंहस्तिकृत्तिप्रियाङ्गनायैनमः
ओंहरिद्राकुङ्कुमादिग्धायैनमः

ओंहर्यश्वाद्यमरार्चितायैनमः
ओंहरिकेशसख्यैनमः
ओंहादिविद्यायैनमः
ओंहालामदालसायैनमः१२०
ओंसकाररूपायैनमः
ओंसर्वज्ञायैनमः
ओंसर्वेश्यैनमः
ओंसर्वमङ्गलायैनमः
ओंसर्वकर्त्र्यैनमः
ओंसर्वभर्त्र्यैनमः
ओंसर्वहंत्र्यैनमः
ओंसनातन्यैनमः
ओंसर्वानवद्यायैनमः
ओंसर्वांगसुन्दर्यैनमः
ओंसर्वसाक्षिण्यैनमः
ओंसर्वात्मिकायैनमः
ओंसर्वसौख्यदात्र्यैनमः
ओंसर्वविमोहिन्यैनमः
ओंसर्वाधारायैनमः
ओंसर्वगतायैनमः
ओंसर्वावगुणवर्जितायैनमः
ओंसर्वारुणायैनमः
ओंसर्वमात्रेनमः
ओंसर्वाभरणभूषितायैनमः१४०

ओंककारार्थायैनमः
ओंकालहन्त्र्यैनमः
ओंकामेश्यैनमः
ओंकामितार्थदायैनमः
ओंकामसञ्जीविन्यैनमः
ओंकल्यायैनमः
ओंकठिनस्तनमण्डलायैनमः
ओंकरभोरवेनमः
ओंकलानाथमुख्यैनमः।
ओंकचजिताम्बुदायैनमः
ओंकटाक्षस्यन्दिकरुणायैनमः
ओंकपालिप्राणनायिकायैनमः
ओंकारुण्यविग्रहायैनमः
ओंकान्तायैनमः
ओंकान्तिधूतजपावल्यैनमः
ओंकलालापायैनमः
ओंकण्बुकण्ठ्यैनमः
ओंकरनिर्जितपल्लवायैनमः
ओंकल्पवल्लीसमभुजायैनमः
ओंकस्तूरीतिलकांचितायैनमः१६०
ओंहकारार्थायैनमः
ओंहंसगत्यैनमः
ओंहाटकाभरणोज्ज्वलायैनमः
ओंहारहारिकुचाभोगायैनमः
ओंहाकिन्यैनमः
ओंहल्यवर्जितायैनमः
ओंहरित्पतिसमाराध्यायैनमः
ओंहटात्कारहतासुरायैनमः
ओंहर्षप्रदायैनमः
ओंहविर्भोक्त्र्यैनमः
ओंहार्दसन्तमसापहायैनमः
ओंहल्लीसलास्यसन्तुष्टायैनमः
ओंहंसमन्त्रार्थरूपिण्यैनमः
ओंहव्यवाहादिसंसेव्यायैनमः
ओंहर्षिण्यैनमः
ओंहरिसोदर्यैनमः
ओंहाहाहूहूमुखस्तुत्यायैनमः
ओंहानिवृद्धिविवर्जितायैनमः
ओंहय्यङ्गवीनहृदयायैनमः
ओंहरिकोपारुणांशुकायैनमः१८०
ओंलकाराख्यायैनमः
ओंलतापूज्यायैनमः
ओंलयस्थित्युद्भवेश्वर्यैनमः
ओंलास्यदर्शनसन्तुष्टायैनमः
ओंलाभालाभविवर्जितायैनमः
ओंलङ्घ्येतराज्ञायैनमः
ओंलावण्यशालिन्यैनमः
ओंलघुसिद्धिदायैनमः



ओंलाक्षारससवर्णाभायैनमः
ओंलक्ष्मणाग्रजपूजितायैनमः
ओंलब्धानन्दायैनमः
ओंलब्धभक्तिसुलभायैनमः
ओंलाङ्गलायुधायैनमः
ओंलग्नचामरहस्तश्रीशारदापरिवी
जितायैनमः
ओंलज्जापदसमाराध्यायैनमः
ओंलम्पटायैनमः
ओंलकुलेश्वर्यैनमः
ओंलब्धमानायैनमः
ओंलब्धरसायैनमः
ओंलब्धसम्पत्समुन्नत्यैनमः२००
ओंह्रींकारिण्यैनमः
ओंह्रींकाराद्यायैनमः
ओंह्रींमध्यायैनमः
ओंह्रींशिखामणयेनमः
ओंह्रींकारकुण्डाग्निशिखायैनमः
ओंह्रींकारशशिचन्द्रिकायैनमः
ओंह्रींकारभास्कररुच्यैनमः
ओंह्रींकाराम्भोदचञ्चलायैनमः
ओंह्रींकारकन्दाङ्कुरिकायैनमः
ओंह्रींकारैकपरायणायैनमः
ओंह्रींकारदीर्धिकाहंस्यैनमः
ओंह्रींकारोद्यानकेकिन्यैनमः
ओंह्रींकारारण्यहरिण्यैनमः
ओंह्रींकारावालवल्लर्यैनमः
ओंह्रींकारपञ्जरशुक्यैनमः
ओंह्रींकाराङ्गणदीपिकायैनमः
ओंह्रींकारकन्दरासिंह्यैनमः
ओंह्रींकाराम्भोजभृङ्गिकायैनमः
ओंह्रींकारसुमनोमाध्व्यैनमः
ओंह्रींकारतरुमञ्जर्यैनमः२२०
ओंसकाराख्यायैनमः
ओंसमरसायैनमः
ओंसकलागमसंस्तुतायैनमः
ओंसर्ववेदार्थतात्पर्यभूम्यैनमः
ओंसदसदाश्रयायैनमः
ओंसकलायैनमः
ओंसञ्चिदानन्दायैनमः
ओंसाध्व्यैनमः
ओंसद्गतिदायिन्यैनमः
ओंसनकादिमुनिध्येयायैनमः
ओंसदाशिवकुटुम्बिन्यैनमः
ओंसकलाधिष्ठानरूपायैनमः
ओंसत्यरूपायैनमः
ओंसमाकृत्यैनमः
ओंसर्वप्रपञ्चनिर्मात्र्यैनमः

ओंसमानाधिकवर्जितायैनमः
ओंसर्वोत्तुङ्गायैनमः
ओंसङ्गरूपायैनमः
ओंसगुणायैनमः
ओंसकलेष्टदायैनमः२४०
ओंककारिण्यैनमः
ओंकाव्यलोलायैनमः
ओंकामेश्वरमनोहरायैनमः
ओंकामेश्वरप्राणनाड्यैनमः
ओंकामेशोत्संगवासिन्यैनमः
ओंकामेशवरालिंगितांग्यैनमः
ओंकामेश्वरसुखप्रदायैनमः
ओंकामेश्वरप्रणयिन्यैनमः
ओंकामेश्वरविलासिन्यैनमः
ओंकामेश्वरतपस्सिद्ध्यैनमः
ओंकामेश्वरमनःप्रियायैनमः
ओंकामेश्वरप्राणनाथायैनमः
ओंकामेश्वरविमोहिन्यैनमः
ओंकामेश्वरकल्पलतायैनमः
ओंकामेश्वरगृहेश्वर्यैनमः
ओंकामेश्वराह्लादकर्यैनमः
ओंकामेश्वरमहेश्वर्यैनमः
ओंकामेश्वर्यैनमः
ओंकामकोटिनिलयायैनमः

ओंकांक्षितार्थदायैनमः२६०
ओंलकारिण्यैनमः
ओंलब्धरूपायैनमः
ओंलब्धधियेनमः
ओंलब्धवाञ्छितायैनमः
ओंलब्धपापमनोदूरायैनमः
ओंलब्धाहङ्कारदुर्गमायैनमः
ओंलब्धशक्त्यैनमः
ओंलब्धदेहायैनमः
ओंलब्धैश्वर्यसमुन्नत्यैनमः
ओंलब्धबुद्ध्यैनमः
ओंलब्धलीलायैनमः
ओंलब्धयौवनशालिन्यैनमः
ओंलब्धातिशयसर्वाङ्गसौन्दर्यायै
नमः
ओंलब्धविभ्रमायैनमः
ओंलब्धरागायैनमः
ओंलब्धपत्यैनमः
ओंलब्धनानागमस्थित्यैनमः
ओंलब्धभोगायैनमः
ओंलब्धसुखायैनमः
ओंलब्धहर्षाभिपूरितायैनमः२८०
ओंह्रींकारमूर्तयेनमः



ओंह्रींकारसौधशृङ्गकपोतिकायै
नमः
ओंह्रींकारदुग्धब्धिसुधायैनमः
ओंह्रींकारकमलेन्दिरायैनमः
ओंह्रींकरमणिदीपार्चिषेनमः
ओंह्रींकारतरुशारिकायैनमः
ओंह्रींकारपेटकमणयेनमः
ओंह्रींकारादर्शबिंबितायैनमः
ओंह्रींकारकोशासिलतायैनमः
ओंह्रींकारास्थाननर्तक्यैनमःओंह्रीं
कारशुक्तिकामुक्तामणयेनमः
ओंह्रींकारबोधितायैनमः

ओंह्रींकारमयसौवर्णस्तंभविदृमपुत्रि
कायैनमः
ओंह्रींकारवेदमध्यस्थायैनमः
ओंह्रींकाराध्वरदक्षिणायैनमः
ओंह्रींकारनन्दनारामनवकल्पकव
ल्लर्यैनमः
ओंह्रींकारहिमवद्गङ्गायैनमः
ओंह्रींकारार्णवकौस्तुभायैनमः
ओंह्रींकारमन्त्रसर्वस्वायैनमः
ओंह्रींकारपरसौख्यदायैनमः३००
ओऐं ह्रीं श्रींश्रीमद्राजराजोश्वर्यै नमः

**इतिश्रीललितात्रिशतीनामावलिःसंपूर्णम्**